


तेलंगाणप्रभुत्वप्रकाशनम्
हैदराबाद्

तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम्



Free

9

# संस्कृतसुधा

## नवमी कक्ष्या

(संयुक्तपाठ्यक्रमः)

9th Sanskrit Reader
(Composite Course)

तेलंगाणप्रभुत्वप्रकाशनम्
हैदराबाद्

तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम्

SCERT TELANGANA

## విద్యార్థులకు సూచనలు

- ప్రతిపాఠంలో ముందుగా ఒక చిత్రం ఉంటుంది. ఆ చిత్రాన్ని చూడండి. దాని కింద ఉన్న ప్రశ్నలకు జవాబులను ఆలోచించి చెప్పండి.
- 'ఛాత్రేభ్యః సూచనాః' అనే గడిలోని సూచనలు చదవండి. వాటి ప్రకారం చేయండి.
- పాఠం చదవడానికి ముందు పాఠ్యాంశచిత్రాలను చూసి పాఠంలోని విషయాన్ని ఊహించండి. చిత్రాల ఆధారంగా సంభాషణలు చెప్పండి.
- ప్రతిరోజు పాఠాన్ని బిగ్గరగా చదవండి. మీ ఉపాధ్యాయుడు చదివేటప్పుడు జాగ్రత్తగా వినండి. మీకు తెలియని పదాలు/చదవలేకపోయిన పదాలను మీ ఉపాధ్యాయుడు ఎలా పలుకుతున్నాడో జాగ్రత్తగా వినండి. మీరు కూడా అలా చదవడానికి ప్రయత్నించండి.
- మీ ఉపాధ్యాయుడు పాఠం చెప్పేటప్పుడు జాగ్రత్తగా వినండి, మీకు తెలియని పదాల గురించి, విషయం గురించి తప్పకుండా అడిగి తెలుసుకోండి.
- పాఠం తర్వాత ఇచ్చిన 'ఏతాని కుర్వంతు' లోని అభ్యాసాలను మీ ఉపాధ్యాయుని అడిగి తెలుసుకోండి. ఆ తర్వాత మీరే సొంతంగా రాయాలి.
- అభ్యాసాలలో ఇచ్చిన ప్రశ్నలకు జవాబులను గైడ్లలో గాని, ఇతరుల నోటుపుస్తకాలలో గాని చూసి రాయకూడదు. ఎందుకంటే దాని వల్ల మీకు సొంతంగా రాయడం రాకుండా పోతుంది.
- అభ్యాసాలలో ఇచ్చిన వ్యాకరణాంశాలు మీకు అర్థంకావడానికి మొదట ఉదాహరణలు ఇచ్చారు. వాటి ఆధారంగా అర్థం చేసుకొని చేయండి.
- స్వీయరచనా, సర్జనాత్మకవ్యక్తీకరణమ్, పరియోజనాకార్యమ్, ప్రశంసలకు సంబంధించిన అభ్యాసాల గురించి ముందుగా ఉపాధ్యాయుడు చర్చ నిర్వహిస్తాడు. మీరు ఆ చర్చలో పాల్గొనండి. తెలియని విషయాలను అడిగి తెలుసుకోండి. మీరే స్వంతంగా అభ్యాసాలను రాయండి. అవసరమైతే మీ తోటి వారితో కలిసి చేయండి.
- మీరు రాసిన జవాబులను తరగతిగదిలో చదివి వినిపించండి. చేసిన ప్రాజెక్టుపనులను ప్రదర్శించండి. మీ ఉపాధ్యాయుడు ఇచ్చిన సూచనల ప్రకారం సరిచేసుకోండి. సరిచేసుకున్న తర్వాతనే నోటు పుస్తకాలలో రాయండి.
- పాఠం చివర 'స్వీయమూల్యాంకనమ్' అనే పట్టిక ఉంది. ఈ పట్టికలోని ఒక్కొక్క వాక్యాన్ని చదవండి. చేయగల్గితే **ఔనని**, చేయలేకపోతే **కాదని** గుర్తించండి. మీరు చేయలేని వాటి గురించి మీ ఉపాధ్యాయుని అడిగి మళ్ళీ అభ్యాసం చేయండి.
- పుస్తకంలో 'పఠంతు-నందంతు' పేరుతో మీకోసం కథలు ఇచ్చారు. వీటిని మీరే సొంతంగా చదవండి, ఆనందించండి.
- పుస్తకంలో "ఛాత్రైః సాధితవ్యాని సామర్థ్యాని" ఉన్న పేజిని చదవండి. దీనిలో ఉన్న సామర్థ్యాలనన్నింటినీ మీరు ఈ తరగతి పూర్తి అయ్యేసరికి చేయగలగాలి.
- పాఠశాలలో మీ స్నేహితులతో, ఉపాధ్యాయులతో సంస్కృతంలోనే మాట్లాడడానికి ప్రయత్నించండి.



चरणौ मृदुलौ स्वल्पौ
मावगच्छ निरर्थकौ ।
प्रश्नवारिदमारुह्य
ज्ञानवृष्टिकणान् पिब ॥

सम्प्रति समस्तच्छात्राणां विद्यायाम् अधिकारः अस्ति ।
यतो हि अधुना विद्यास्वाम्यनियमः ( R T E ) आगतः ।

SCERT TELANGANA

# संस्कृतसुधा

## नवमी कक्ष्या

### संयुक्तपाठ्यक्रमः

9th Sanskrit Reader

(Composite Course)

### सम्पादकमण्डली


**आचार्य विरिवेण्टि मुरलीधरशर्मा**
शिक्षाविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः

**डा.दोर्बल प्रभाकरशर्मा**
विश्रान्तप्राचार्यः,
श्री वाड्रेवु जोगम्म वेदसंस्कृतकलाशाला,
कोव्वूरु, पश्चिमगोदावरी जिल्ला

**विद्वान् तिगुल्ल श्रीहरिशर्मा**
विश्रान्तप्राचार्यः
श्रीराजराजेश्वरसंस्कृतकलाशाला
वेमुलवाडा, करींनगर्जिल्ला


### विषयनिपुणौ


**आचार्य रमाकान्त अग्निहोत्री**
विश्रान्तप्राचार्यः, दिल्लीविश्वविद्यालयः
नवदेहली

**श्री सुवर्ण विनायकः,**
संयोजकः, राज्यविद्यापरिशोधनशिक्षणसंस्था,
तेलंगाण, हैदराबाद्


### संयोजिका


**श्रीमती के.आर्.टि.एल्.ज्योतिर्मयी,**
उपन्यासिका, राज्यविद्यापरिशोधनशिक्षणसंस्था, हैदराबाद्.


### पाठ्यपुस्तकविकासमुद्रापकसमितिः


**प्रधाननिर्वहणाधिकारी**
**ए. सत्यनारायण रेड्डि,**
सञ्चालकः,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्

**निर्वाहकः**
**डा॥ नन्नूरु उपेन्दर् रेड्डि**
आचार्यः,
विद्याप्रणालिकापाठ्यपुस्तकविभागः,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्

**प्रधानव्यवहारनिर्वाहकः**
**श्री बि.सुधाकरः**
सञ्चालकः,
प्रभुत्वपाठ्यपुस्तकमुद्रणालयः,
हैदराबाद्

## तेलंगाणप्रभुत्वप्रकाशनम्


*सत्यमेव जयते*
*विद्या ददाति विनयम्*

*धर्मो रक्षति रक्षितः*
*कृषितो नास्ति दुर्भिक्षम्*


SCERT TELANGANA

© Government of Telangana, Hyderabad

*First Published 2013*
*New Impressions 2014, 2015, 2016, 2017, 2018*

**All rights reserved**

No part of this publication may be reproduced, stored in a retrieval system, or transmitted, in any form or by any means without the prior permission in writing of the publisher, nor be otherwise circulated in any form of binding or cover other than that in which it is published and without a similar condition including this condition being imposed on the subsequent purchaser.

The copy right holder of this book is the Director of School Education, Hyderabad, Telangana.

This Book has been printed on 70 G.S.M. SS Maplitho
Title Page 200 G.S.M. White Art Card

**तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम् 2018-19**

*Printed in India*
at the Telangana Govt.Text Book Press,
Mint Compound, Hyderabad,
Telangana.

SCERT TELANGANA

# पुरोवाक्

भाषा विचाराणामुपयोगार्थं प्रभावि साधनम् । बालाः जन्मतः अनेकभाषाः ज्ञातुं समर्थाः भवन्ति इति भाषाशास्त्रज्ञाः न्यरूपयन् । बालाः पाठशालायाः प्रवेशात् पूर्वमेव ते स्वपरिसरेषु केवलश्रवणेन विविधभाषाः अधिगच्छन्तीति विषयः अस्माकम् अनुभवे अस्त्येव । विविधभाषाभ्यासेन बालानां ज्ञानं विस्तृतं भवति । बहुभाषावेत्तृषु बालेषु प्रज्ञा विशिष्टा भवति इति बहुभिः परिशोधनैः निरूपितम् ।

अस्माकं देशे त्रिभाषासूत्रं प्रयोगे अस्तीति कारणतः पाठशालाशिक्षायां बालाः प्रथमभाषारूपेण मातृभाषाम्, द्वितीयभाषात्वेन प्रान्तीयभाषाम् अथवा हिन्दीभाषां, तृतीयभाषात्वेन आङ्ग्लभाषां च अभ्यस्यन्ति । त्रिभाषासूत्रानुसारं संस्कृतम् अस्माकं राज्ये ऐच्छिकभाषारूपेण अधीयते । अत्र संयुक्तपाठ्यक्रमे अंशतया प्रथमभाषया तेलुगुभाषया सह संस्कृतं बोध्यमानमस्ति । संयुक्तपाठ्यक्रमे विंशत्यङ्कानां कृते संस्कृतं परिकल्पितम् । राष्ट्रियविद्याप्रणालिकापत्रम् २००५ संस्कृतम् आधुनिकभाषात्वेन अधिगन्तुं शक्यते इति सूचयति ।

अनादिकालतः संस्कृतस्य भारतीयभाषाभिः अविनाभावसम्बन्धः अस्ति । अतः इतरभाषाः इव भारतस्य बहुभाषिकत्वे संस्कृतम् अविभाज्यम्, अनिवार्यञ्च । संस्कृतभाषाध्ययनेन इतरभाषापदानां परिचयः भवति । तेन भाषान्तरेषु विद्यमानानां शास्त्रसाङ्केतिकपारिभाषिकपदानां निर्दुष्टोच्चारणम्, अवगमनं सुकरं भवति । नैतिक-सामाजिकमूल्यानि, धार्मिकदृष्टिः, ऋजुवर्तनम् इत्यादयः गुणाः संस्कृताध्ययनेन जायन्ते ।

प्राचीनकालतः अद्यावधि तेलुगुभाषायां संस्कृतपदानि असङ्ख्याकानि व्यवहारे सन्ति । संस्कृताध्ययनं ये कुर्वन्ति ते तेलुगुभाषां समर्थतया उपयोक्तुं शक्नुवन्ति। राज्यविद्याप्रणालिकापरिधिपत्रम् २०११ संस्कृताध्ययनस्य आवश्यकतां प्रस्तौति ।

संस्कृतभाषाबोधने अध्यापकानां दायित्वं बहु वर्तते। तैः अनिवार्यतया संस्कृतेनैव सम्भाषणं करणीयम् । अभ्यसने सर्वेषां छात्राणां भागग्रहणं स्यात्। यथासाध्यं संस्कृतपदानि, तेलुगुभाषागततत्समपदैः तोलयन्तः, छात्रैः तानि वाचयन्तः, संस्कृतभाषावातावरणस्य निर्माणे अध्यापकाः पर्याप्तमवसरं कल्पयेयुः । तदर्थं सरलमौखिकसम्भाषणानि, गीतानि जून्, जुलै मासयोः अभ्यासनीयानि।

एतस्य पाठ्यपुस्तकस्य रूपकल्पने भागभाजाम् , उपाध्यायानाम्, उपन्यासकानां, विषयनिपुणानां, चित्रकाराणां, कार्यसंयोजकानाम्, उट्टङ्ककानां, चित्रसंयोजकानां, पाठ्यपुस्तकरूपकल्पने सहकृतवतां देहलीविश्वविद्यालयीयप्राचार्याणां रमाकान्त-अग्निहोत्रिमहोदयानाम्, सम्पादकमण्डलिसभ्यानाम्, सर्वेषां कृते विशेषकृतज्ञताः ।

एतस्मिन् पाठ्यपुस्तके पाठ्यांशतया स्वप्रकाशनेभ्यः बहूनंशान् सङ्ग्रहीतुम् अनुमतिं दत्तवत्यै **संस्कृतभारत्यै** विशेषधन्यवादाः । पाठ्यपुस्तकमिदं छात्राणां भाव्यभ्यसनाय आवश्यकानि सामर्थ्यानि, पाटवं च वर्धयतीति आशास्महे ।

सञ्चालकः
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्


तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम् 2018-19
SCERT TELANGANA

# अध्यापकेभ्यः सूचनाः

- पाठ्यपुस्तकस्य उपयोगात् पूर्वं पाठ्यपुस्तकेन अपेक्षितानि सामर्थ्यानि ज्ञातव्यानि । पुरोवाक्, विषयसूची इत्यादिकम् अवश्यं पठनीयम् ।
- पाठ्यपुस्तकं प्रथमभाषायाः तेलुगुभाषायाः अनुबन्धरूपेण उपयोक्तव्यम्।
- मातृभाषायाः बोधनार्थं सप्ताहे चतुरः कालांशान्, संस्कृतस्य पाठनाय कालांशद्वयं च उपयोक्तव्यम्।
- एतस्य पाठ्यपुस्तकस्य बोधनार्थम् एकस्मिन् विद्यासंवत्सरे प्रायशः ७५ कालांशाः भवन्ति ।
- प्रत्येकमपि पाठस्य अष्टौ कालांशाः इति अंशं, तथैव ५६ कालांशान् दृष्टौ निधाय पाठ्यपुस्तकं निर्मितम् । तदनुगुणं कालांशविभजनं कृत्वा प्रणालिका रचनीया । बोधनाभ्यासप्रक्रियाश्च निर्वोढव्याः ।
- अष्टसु कालांशेषु पाठगतस्य विषयस्य बोधनाय त्रयः कालांशाः उपयोक्तव्याः । अवशिष्टकालांशान् उन्मुखीकरणाय, गणशः पाठनाय, अर्थावगमनाय, अभ्यासान् कारयितुं, व्यक्तिगतपाठनाय च उपयोक्तव्याः ।
- पाठबोधनस्य अपेक्षया अभ्यासान् कारयितुमेव अधिकाः कालांशाः उपयोक्तव्याः । एतदर्थम् आवश्यकतानुसारम् उपाध्यायः छात्राणां साहाय्यं कुर्यात् ।
- पुस्तके छात्रैः साधनीयानां सामर्थ्यानां पट्टिका अस्ति। अध्यापकाः छात्रैः तानि साधयेयुः ।
- सर्वस्य पाठस्य आरम्भे उन्मुखीकरणमित्यंशः अस्ति । तदधिकृत्य छात्रैः सम्भाषणं कारयितव्यम् । शिक्षकाः तदर्थं दत्तैः प्रश्नैः सह चिन्तयितुं योग्यान् अन्यानपि प्रश्नान् प्रष्टुं शक्नुवन्ति ।
- पाठ्यांशबोधनात् पूर्वमेव तत्रस्थान् श्लोकान् गीतानि च उपाध्यायाः आदर्शपूर्णतया वाचयेयुः । छात्राः च अनुवाचनं कुर्युः ।
- व्यक्तिशः प्रवाहपूर्णतया पाठं पठितुम् अभ्यासः कारयितव्यः ।
- छात्राः गणशः उपविश्य पाठ्यांशं सम्भाषणरूपेण यथा वदेयुः तथा अध्यापकैः व्यवस्था करणीया ।
- व्याकरणम् अनुप्रयुक्ततया बोधनीयम्। तदनुसृत्य एव अभ्यासाः कारयितव्याः ।
- एकस्मिन् पाठे निर्दिष्टानि सामर्थ्यानि ८०% छात्राः साधयन्ति चेदेव पाठान्तरं बोधनीयम् । एतदर्थं मासे स्थितानां कालांशानां विभजनार्थं योजना करणीया ।
- छात्राणां व्यक्तिशः पठनं प्रथमं भवेत् । ततः आवश्यकतानुसारं गणशः कार्यं दातव्यम् । गणशः कार्याणां कक्ष्याप्रकोष्ठे प्रदर्शनानन्तरं तद्गतानां दोषाणां चर्चया निराकरणं कुर्युः ।

  **शृण्वन्तु,विचिन्त्य वदन्तु** - अत्रस्थानि कृत्यानि पूर्णतया कक्ष्याप्रकोष्ठे एव कारयितव्यानि ।

  **पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु** - कृत्यानि व्यक्तिशः अथवा गणशः कारयितव्यानि ।

  **पदजालाभिवृद्धिः** - गणशः कृत्यानि कारयितव्यानि । ततः व्यक्तिशः लेखनीयानि ।

  **व्याकरणम्** - व्याकरणांशानां बोधनसमये उदाहरणानि **कृष्णफलके लेखनीयानि।** ततः चर्चया विषयावगमनं कारयितव्यम् । ततः अभ्यासकृत्यानि कारयितव्यानि ।

  **स्वीयरचना, सर्जनात्मकव्यक्तीकरणम्, परियोजनाकार्यम्, प्रशंसा** इत्येतानि सामर्थ्यानि उद्दिश्य लेखनार्थं सम्पूर्णकक्ष्यायां सूचनाः देयाः । तदनन्तरं छात्रैः एतानि सामर्थ्यानि कारयितव्यानि।
- छात्रैः लिखितेषु विषयेषु दोषाणां निवारणार्थं कक्ष्याप्रकोष्ठे चर्चा आयोजनीया । चर्चासमये क्रमशः भावः, वाक्यनिर्माणम्, पदानामौचित्यम्, अक्षरदोषाः च चिन्तनीयाः । आत्मना कृतान् दोषान् छात्राः स्वयमेव जानीयुः ।

  **स्वीयमूल्याङ्कनम्** - तत्रत्यान् अंशान् आधारीकृत्य स्वयं छात्राः मूल्याङ्कनं कुर्युः। तदर्थं ते अध्यापकैः प्रोत्साहनीयाः।

SCERT TELANGANA

✦ पाठ्यांशबोधनसमये अधः दत्तानि सोपानानि अनुसरणीयानि ।

I. **उपोद्घातः** - स्वागतभाषणम्, उन्मुखीकरणम्, शीर्षिकाप्रकटनम्, नेपथ्यम् ।

II. **पाठ्यांशबोधनेषु / सामर्थ्येषु अवगमनम्** - चित्राण्युद्दिश्य भाषणम्, अध्यापकस्य आदर्शपठनम्, छात्राणां बाह्यपठनम्, छात्रैः अर्थसङ्ग्रहणम्, पाठितविषये चर्चा, अवगमनम्।

III. **अवगमनपरिशीलनम्** - पाठितविषयेषु छात्रावगमनपरिशीलनम् ।

IV. **गृहकार्यम्** - (परियोजनाकार्य-प्रशंसा-बोधितविषयाणां सम्बद्धं गृहकार्यम्)

✦ प्रत्येकमपि पाठेन साधितव्यानां सामर्थ्यानां साधनाय प्रणाली संरचनीया । संस्कृते पाठ्यप्रणाली अधो दत्तप्रकारेण निर्मातव्या ।

१. पाठस्य नाम -

२. पाठं बोधयितुम् आवश्यककालांशाः -

३. साधितव्यानि सामर्थ्यानि -

४. कालांशानुसारं विभागः -

| कालांश-सङ्ख्या | बोधनांशः | बोधनव्यूहाः | सामग्री / संसाधनानि | छात्रेभ्यः दीयमानः अभ्यासः, गृहकार्यञ्च |
|---|---|---|---|---|
| | | | | |

५. पाठ्यबोधनार्थम् आवश्यकतातिरिक्तसमाचारसङ्ग्रहणम् (अध्यापककृत्यम्)।

६. पाठ्यबोधनानन्तरम् अध्यापकस्य प्रतिस्पन्दनानि (अनुभवाः, अनुभूतयश्च) ।

✦ एवम् 'एतानि कुर्वन्तु' इति शीर्षिकागतांशेषु एकैकं कतिभिः छात्रैः कृतमिति परिशीलयेत् । आवश्यकतानुसारं प्रत्याम्नायबोधनं निर्वोढव्यम् ।

✦ सामर्थ्यसाधनार्थं कदापि मार्गदर्शिकाम् (Guide), अध्ययनसामग्रीं (Study material) दृष्ट्वा प्रश्नानां समाधानानाम् अभ्यासानां च लेखनं न कारयेत् । यद्येवं दृष्ट्वा लिख्यते तर्हि अङ्काः न प्रदीयन्तेति वदेत्। स्वीयबुद्ध्या लिखितांशानेव परिशीलयेत् ।

✦ निरन्तरसमग्रमूल्याङ्कनविध्यनुसारं छात्रप्रगतिं प्रतिदिनं पञ्जीकुर्यात् । एतदर्थं प्रत्येकपञ्जीकरणपुस्तिका स्थापनीया।

✦ निरन्तरसमग्रमूल्याङ्कनविधानेन जूलै, आगस्ट्, नवम्बर्, फिब्रवरीमासेषु आयोज्यमाननिर्माणात्मक मूल्याङ्कनेषु छात्राणां भागग्रहणपरिशीलनं, लिखितविषयाः, कृतपरियोजनाकार्याणि, लघुपरीक्षा चेति एतैः चतुर्भिः छात्रप्रगतिं निर्धार्य छात्रप्रगतिसूचकपुस्तिकासु पञ्जीकरणं कुर्यात्। एतदर्थं प्रत्येकच्छात्रप्रगतिपञ्जीकरणपुस्तिका समुपस्थापनीया ।

✦ सेप्टेम्बर्/अक्टोम्बर्, डिसेम्बर्/जनवरी, एप्रिल्मासेषु अयोज्यमानसङ्ग्रहणात्मकमूल्याङ्कनार्थम् अध्यापकैरेव स्वयं सामर्थ्याधारितप्रश्नपत्रं पठनम् (५ अङ्काः), स्वीयरचना (५ अङ्काः), सर्जनात्मकव्यक्तीकरणम् (५ अङ्काः), पदजालाभिवृद्धिः, व्याकरणांशाः (५ अङ्काः) प्रकारेण निर्मातव्यम् ।

✦ अनुबन्धे शब्दाः, धातवः दत्ताः सन्ति । पाठ्यांशेषु कृत्यानाम् अभ्याससमये सन्दर्भानुसारम् अनुबन्धे दत्तानां शब्दानां धातूनां च अभ्यासः छात्रैः कारयितव्यः ।



SCERT TELANGANA

# वन्दे मातरम्

- बङ्किञ्चन्द्र छटर्जी

वन्दे मातरं, वन्दे मातरम्
सुजलां सुफलां मलयजशीतलाम्
सस्यश्यामलां मातरं वन्दे मातरम्
शुभ्रज्योत्स्नापुलकितयामिनीम्
फुल्लकुसुमितद्रुमदलशोभिनीम्
सुहासिनीं सुमधुरभाषिणीम्
सुखदां वरदां मातरं, वन्दे मातरम्

# पठत संस्कृतम्

- श्री मञ्जुनाथशर्मा

पठत संस्कृतं, वदत संस्कृतम्
लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि ॥ पठत ॥

ज्ञानवैभवं वेदवाङ्मयम्
लसति भवभयापहारि यत्र मुनिभिरार्जितम्
कीर्तिरार्जिता यस्य प्रणयनात्
व्यास-भास-कालिदास-बाणमुख्यकविभिः ॥ पठत ॥

स्थानमूर्जितं यस्य मन्वते
वाग्विचिन्तका हि वाक्षु यस्य वीक्ष्य मधुरताम्
यद्विना जना नैव जानते
भारतीयसंस्कृतिं सनातनाभिदां वराम् ॥ ॥ पठत ॥

जयतु संस्कृतं संस्कृतिस्तथा
संस्कृतस्य संस्कृतेश्च प्रणयनाच्च मनुकुलम्
जयतु संस्कृतं, जयतु मनुकुलम्
जयतु जयतु संस्कृतं, जयतु जयतु मनुकुलम् ॥ ॥ पठत ॥

SCERT TELANGANA

# राष्ट्रियगीतम्

- रवीन्द्रनाथ् ठागूर्

जनगणमन अधिनायक जय हे !
भारतभाग्यविधाता !
पञ्जाब सिन्धु गुजरात मराठा,
द्राविड उत्कल वङ्ग !
विन्ध्य हिमाचल यमुना गङ्गा
उच्चलजलधितरङ्ग !
तव शुभ नामे जागे !
तव शुभ आशिष मागे !
गाहे तव जय गाथा !
जनगणमङ्गलदायक जय हे
भारतभाग्यविधाता !
जय हे ! जय हे ! जय हे !
जय जय जय जय हे !

# प्रतिज्ञा

- पैडिमर्रि वेंकट सुब्बाराव

भारतदेशः मम मातृभूमिः । भारतीयास्सर्वे मम सहोदराः ।

अहं मम देशं प्रीणामि । सुसम्पन्ना, बहुविधा भारतीया सांस्कृतिकसम्पत् मम गर्वकारणम् । तस्याः योग्यजनो भवितुं सर्वदा अहं परिश्रमं करोमि ।

मम मातापितरौ, उपाध्यायान्, ज्येष्ठान् सर्वान् च पूजयामि। सर्वैः सह सगौरवं व्यवहरामि ।

मम देशस्य विषये, प्रजानां विषये सेवानिरतिं भजामि । जन्तूनां विषये दयालुः भवामि इति च प्रतिज्ञां करोमि ।

सर्वेषां श्रेयोऽभिवृद्धयः एव मम आनन्दस्य कारणम् ।

SCERT TELANGANA

# पाठ्यपुस्तकरूपकर्तारः

**श्रीमती के.आर्.टि.एल्.ज्योतिर्मयी**
उपन्यासिका,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्.

**श्रीमती पि.माधवी**
अध्यापिका,
ब्रिलियण्ट् ग्रामर् उन्नतपाठशाला,
दिलशुखनगरम्, हैदराबाद्

**डा.मरुधूरि नरसिंहाचार्यः**
सहाध्यापकः
नगरपालकोन्नतपाठशाला
विजयवाडा, कृष्णा जिल्ला

**श्री नमिलिकोण्ड हरिप्रसादः**
विश्रान्तप्रधानोपाध्यायः,
श्रीराजराजेश्वरसंस्कृतपाठशाला,
वेमुलवाडा, करींनगर् जिल्ला

**श्री तिरुनगरि लक्ष्मणस्वामी**
सहाध्यापकः
श्री राजराजेश्वरसंस्कृतपाठशाला,
वेमुलवाडा, करींनगर् जिल्ला

**डा.नारायणं वेङ्कटराम्बाबु**
सहाध्यापकः,
जिल्लापरिषत् उन्नतपाठशाला,
नकरिकल्लु, गुण्टूरु जिल्ला

**श्री इक्कुर्ति वेङ्कटेश्वर्लु**
सहाध्यापकः
गेट् उपाध्यायशिक्षणकलाशाला
तिरुपति, चित्तूरु जिल्ला

**श्री तुर्लपाटि शिवरामकृष्णः**
संस्कृताध्यापकः
दिल्ली पब्लिक् स्कूल्
नाचारम्, हैदराबाद्।

**श्री के.रङ्गराजु**
सहाध्यापकः
जिल्लापरिषत् उन्नतपाठशाला
रङ्गापुरम्, रङ्गारेड्डि जिल्ला

**श्री एन.सुब्रह्मण्येश्वरशर्मा**
सहाध्यापकः
पि.वि.आर्.पुरपालकबालिकापाठशाला
ओङ्गोल्

**श्री कोम्पल्लि शिवकुमारः**
सहाध्यापकः
जिल्लापरिषत् उन्नतपाठशाला
पर्लपल्लि, करींनगर् जिल्ला।

# चित्रकाराः

**कूरेल्ल श्रीनिवास्,** प्रधानाध्यापकः, जिल्लापरिषत् उन्नतपाठशाला, कुर्मेड्, नल्लगोण्ड जिल्ला
**के.बाबु,** प्रधानाध्यापकः, जिल्लापरिषत् उन्नतपाठशाला वज्रेपल्लि, निजामाबाद् जिल्ला
**टी.वि. रामकृष्णः,** चित्रलेखनाध्यापकः, जिल्लापरिषत् उन्नतपाठशाला, दुद्देड, मेदक् जिल्ला
**टि.वि. मोहन्राज्,** चित्रलेखनाध्यापकः, सङ्क्षेमगुरुकुलपाठशाला, वेलिगोण्ड, प्रकाशं जिल्ला
**वड्डेपल्लि वेङ्कटेश्वर्लु,** अध्यापकः, प्राथमिकपाठशाला, सोमवरं, नल्लगोण्ड जिल्ला
**ए. गौरय्या(गौतम्),** चित्रलेखनाध्यापकः,जिल्लापरिषत् उन्नतपाठशाला, नकिरेकल, नल्लगोण्ड जिल्ला
**वि.वि.आर्. चारि,** चित्रकारः, निर्मल्, आदिलाबाद् जिल्ला
**कस्तूरि प्रभाकर्,** चित्रलेखनाध्यापकः,जिल्लापरिषत् उन्नतपाठशाला, पिल्लमर्रि, नल्लगोण्ड जिल्ला
**के राघवाचारि,** चित्रलेखनाध्यापकः,जिल्लापरिषत् उन्नतपाठशाला, नकरिकल्, नल्लगोण्ड जिल्ला

# उट्टङ्कः

**श्री तुर्लपाटि शिवरामकृष्णः,** संस्कृताध्यापकः, दिल्ली पब्लिक् स्कूल्, नाचारम्, हैदराबाद्

SCERT TELANGANA

# विषयसूची


| पाठस्य नाम | प्रक्रिया | मासः | पृष्ठसङ्ख्या |
|---|---|---|---|
| **प्रथमः भागः** | | | |
| १. समर्थः कः ? | सुभाषितश्लोकाः | जून् जुलै | 1-9 |
| ❖ कतमः योग्यः ? | पठन्तु, नन्दन्तु | | 10 |
| **द्वितीयः भागः** | | | |
| २. मृद्विनायकः | दूरदर्शने चर्चा | आगस्ट् | 11-20 |
| ३. रामप्पदेवालयः | निबन्धः | सेप्टेम्बर् अक्टोबर् | 21-29 |
| ❖ चिन्ता | पठन्तु, नन्दन्तु | | 30 |
| **तृतीयः भागः** | | | |
| ४. परिचिन्तयन्तु | चाटुश्लोकाः | नवम्बर् | 31-40 |
| ५. सत्यनिष्ठा | कथा | डिसम्बर् | 41-49 |
| ❖ मां दग्ध्वा खादन्तु..... । | पठन्तु, नन्दन्तु | | 50 |
| **चतुर्थः भागः** | | | |
| ६. वसुधैव कुटुम्बकम् | प्रसङ्गपाठः | जनवरी | 51-58 |
| ७. भूमाता | आत्मकथा | फ़्रिब्रवरी | 59-68 |
| पुनश्चरणम् | | मार्च्, एप्रियल् | |

**अनुबन्धः**

| | |
|---|---|
| शब्दरूपाणि | 69-72 |
| धातुरूपाणि | 73-82 |
| पदकोशः | 83-85 |
| क्रियापदकोशः | 86 |


❖ इत्यनेन चिह्नेन चिह्निताः अंशाः मूल्याङ्कनाय न उपयोक्तव्याः ।

SCERT TELANGANA

# अनेन पाठ्यपुस्तकेन छात्रैः साधितव्यानि सामर्थ्यानि

**I. श्रुण्वन्तु, विचिन्त्य वदन्तु**

- ❖ गीतानि, श्लोकाः, सम्भाषणानि, कथाः इत्यादीन् विषयान् श्रुत्वा छात्राः अवगच्छेयुः। तेषां भावान् मातृभाषया वक्तुं शक्नुयुः।
- ❖ संस्कृतेन पृष्टान् प्रश्नान् छात्राः अवगच्छेयुः। तेषां योग्यानि समाधानानि संस्कृतेन वदेयुः। ज्ञातान् विषायान् अधिकृत्य संस्कृतेन वदेयुः।
- ❖ लघूनि संस्कृतभाषणानि कर्तुं शक्नुयुः।

**II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु**

- ❖ श्लोकाः, कथाः, गीतानि, सम्भाषणानि, आत्मकथाः, निबन्धाः, लेखाः इत्यादिसंस्कृतविषयान् अवगच्छेयुः धाराप्रवाहतया पठेयुश्च।
- ❖ पाठितस्य विषयस्य आधारेण दत्तानां प्रश्नानां समाधानानि लिखेयुः। पठनावगमनस्थानि कृत्यानि दोषान् विना कुर्युः।
- ❖ अपरिचितानां कथानां पत्रिकाणां च पठनेन विषयानवगच्छेयुः।

**III. स्वीयरचना**

- ❖ ज्ञातान् दृष्टान् श्रुतान् च विषयान् उद्दिश्य स्वप्रतिस्पन्दनं संस्कृतेन लेखितुं शक्नुयुः।
- ❖ बहुसमाधानवतां प्रश्नानां संस्कृतेन उत्तराणि लिखेयुः।
- ❖ आत्मानं तत्तत्सन्दर्भे ऊहित्वा तत्र अहं किं कर्तुं शक्नुयामिति विचिन्त्य प्रत्येकमपि छात्रः संस्कृतेन स्वानुभवं लेखितुं शक्नुयात् ।

**IV. पदजालाभिवृद्धिः**

- ❖ पाठ्यमानेषु अथवा श्रूयमाणेषु विषयेषु स्थितानां नूतनपदानां सन्दर्भानुगुणम् अर्थं ग्रहीतुं शक्नुयुः।
- ❖ ज्ञातपदानामाधारेण स्वयं वाक्यानि लेखितुं शक्नुयुः।
- ❖ समानार्थकपदानि विरुद्धार्थकपदानि च ज्ञातुं शक्नुयुः।

**V. सर्जनात्मकव्यक्तीकरणम्**

- ❖ प्रक्रियापरिवर्तनं कर्तुं शक्नुयुः।
- ❖ कथाः, गीतानि, कविताः स्मरेयुः स्वयं रचयेयुः च।
- ❖ लेखानां लेखनसामर्थ्यं प्राप्नुयुः । चित्राणां लेखनं तेषां वर्णनं च स्वयं कर्तुं शक्नुयुः।
- ❖ तेलुगुभाषांशानाम् अनुवादं संस्कृतेन कर्तुं शक्नुयुः।

**VI. प्रशंसा**

- ❖ कवीनां, रचयितॄणां च रचनाविधानं प्रशंसितुं शक्नुयुः।
- ❖ स्फूर्तिप्रदं विषयमधिकृत्य लिङ्ग-धर्म-वर्गादिभेदान् विना प्रशंसां कुर्युः।
- ❖ अन्येषां संस्कृतिसम्प्रदायान् प्रशंसेयुः।

**VII. व्याकरणांशाः**

- ❖ भाषाभागान् व्याकरणांशान् च ज्ञातुं शक्नुयुः। विभक्तीः अवगच्छेयुः । तासां प्रामुख्यं च जानीयुः। विना दोषं तासां प्रयोगसामर्थ्यञ्च प्राप्नुयुः ।
- ❖ वाक्यभेदान् जानीयुः। स्वयं प्रयोक्तुं शक्नुयुः।
- ❖ लिङ्गभेदान् विना दोषं प्रयुञ्जीरन् ।
- ❖ कालानुसारं लकाराणां पुरुषाणां च प्रयोगे समर्थाः भवेयुः ।
- ❖ सन्धीनां संयोजने, विघटने, समासानां विग्रहवाक्यानां च प्रयोगे समर्थाः भवेयुः।

प्रथमः भागः

# ९. समर्थः कः ?

चित्रं पश्यन्तु, विचिन्त्य वदन्तु



**प्रश्नाः**

१. चित्रे कः अस्ति? तस्य नाम किम् ?

२. चित्रे सः किं करोति ?

३. सः कं लङ्घयति? किमर्थम् ?


**उद्देश्यम्** - सामर्थ्येन प्राप्यमाणानां लाभानाम् अवगमनम् । छात्रैः स्वसामर्थ्यानाम् अवगमनम् ।

**छात्रेभ्यः सूचनाः** -

१. श्लोकान् पठन्तु । अनवगतानां पदानां वाक्यानाञ्च अधः रेखाङ्कनं कुर्वन्तु ।

२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।

३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।



१. पतन्नप्युत्पतत्यार्यः समर्थः कन्दुको यथा ।
असमर्थः पतत्येव मृत्पिण्ड इव निष्क्रियः ॥

२. कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥


३. परिवर्तिनि संसारे मृतः को वा न जायते ।
स जातो येन जातेन याति वंशः समुन्नतिम् ॥

४. गुणी गुणं वेत्ति न वेत्ति निर्गुणो
बली बलं वेत्ति न वेत्ति दुर्बलः ।
पिको वसन्तस्य गुणं न वायसो
करी च सिंहस्य बलं न मूषिकः ॥



५.	सर्वत्र गुणवानेव चकास्ति प्रथितो नरः ।
मणिः मूर्ध्नि गले बाहौ पादपीठेऽपि शोभते ॥

६.	सन्तुष्टौ पितरौ यस्मिन् अनुरक्ताः सुहृद्गणाः ।
गायन्ति यद्यशो लोकाः तेन लोकत्रयं जितम् ॥



७.	सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरियं सत्त्ववतां न खलु वयः तेजसो हेतुः ॥

८.	नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः ।
विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता ॥



SCERT TELANGANA

**భావాః :**

1. సమర్థుడు కిందపడితే బంతిలాగా పైకి లేస్తాడు. అసమర్థుడు కిందపడితే మట్టిముద్దలాగా అక్కడే ఉండిపోతాడు. అనగా సమర్థుడు ఏదైనా విషయంలో ఓడిపోతే రెట్టింపు ఉత్సాహంతో పనిచేసి విజయం సాధిస్తాడు. అసమర్థుడు ఏదైనా విషయంలో ఓడిపోతే నిరుత్సాహంతో అక్కడే ఆగిపోతాడు.
2. సమర్థులకు ఏదీ భారం (కష్టం) అనిపించదు. నిరంతరము కష్టపడేవాడికి ఏదీ దూరం కాదు. మంచి విద్య కలవాడికి ఏదీ విదేశం కాదు. మంచిగా మాట్లాడగలిగే నేర్పుగలవాడికి ఎవరూ శత్రువు కాడు.
3. నిరంతరం మార్పు చెందుతున్న ఈ ప్రపంచంలో మానవులు పుడుతుంటారు, మరణిస్తుంటారు. ఎవని పుట్టుకతో వంశం గొప్పతనాన్ని పొందుతుందో అతడే నిజంగా పుట్టినవాడు.
4. గుణవంతుడే ఇతరులలో ఉన్న గొప్పగుణాలను తెలుసుకోగలడు. గుణవంతుడు కానివాడు తెలుసుకోలేడు. కోకిల వసంతఋతువు యొక్క ప్రత్యేకతను తెలుసుకోగలదు. కాని కాకి తెలుసుకోలేదు. ఏనుగు సింహం యొక్క బలాన్ని తెలుసుకోగలదు. ఎలుక తెలుసుకోలేదు.
5. ప్రతిచోట గుణవంతుడైన వాడే కీర్తిని పొందుతాడు. మణి తలపై, కంఠంలో, చేతులలో, పాదపీఠంలో ఎక్కడున్నా ప్రకాశిస్తూనే ఉంటుంది కదా!
6. ఎవరిని చూసి తల్లిదండ్రులు ఆనందపడుతారో, స్నేహితులు అభిమానిస్తారో, ప్రజలు ఎవరి కీర్తిని గానం చేస్తారో, అతడు మూడులోకాలను గెలువగలడు.
7. సింహం యొక్క శిశువు కూడా మదపుటేనుగు కుంభస్థలాలను పగులగొట్టుటకు వాటిపైకి దూకుతుంది. సమర్థత కలవారికి ఇది సహజగుణం. పరాక్రమానికి వయసు కారణం కాదు కదా!
8. సింహానికి జంతువులన్నీ కలసి పట్టాభిషేకం చేయలేదు. ఎన్నికల ద్వారా సింహాన్ని ఎన్నుకోనూ లేదు. సింహము తన సమర్థత వలన స్వయంగా మృగరాజు అనే పదవిని అలంకరించింది.

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

#### अ. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. पाठगतश्लोकान् कण्ठस्थीकुर्वन्तु । रागयुक्तं च गायन्तु ।

२. पाठस्थाः श्लोकाः कं विषयं बोधयन्ति ?

३. पाठस्थाः श्लोकाः किमर्थं पठनीयाः ?

४. श्लोकेषु तव इष्टः श्लोकः कः ? किमर्थम् ?



SCERT TELANGANA

५. एकत्र द्वौ छात्रौ उपविश्य एकः श्लोकम्, अन्यः तस्य भावं च वदेत् ।

६. पाठस्थस्य द्वितीयश्लोकस्य भावं वदन्तु ।

७. प्रथमश्लोके कविः समर्थम् अधिकृत्य किमुक्तवान् ?

## आ. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. पाठं पठित्वा अनुस्वारान्तपदानि अन्विष्य एकत्र लिखन्तु ।

२. अधः दत्तानि पदानि कस्मिन् श्लोके सन्तीति ज्ञात्वा श्लोकसङ्ख्यां कुण्डल्यां लिखन्तु ।

| | | | | | |
|---|---|---|---|---|---|
| १. | कन्दुकः | (    ) | ५. | वसन्तस्य | (    ) |
| २. | अतिभारः | (    ) | ६. | पादपीठे | (    ) |
| ३. | वंशः | (    ) | ७. | लोकत्रयम् | (    ) |
| ४. | गुणी | (    ) | ८. | मृगेन्द्रता | (    ) |

३. अधः दत्तं परिच्छेदं पठित्वा प्रश्नानां निर्माणं कुर्वन्तु ।

योग्यः पुत्रः अस्ति चेत् धनसम्पादनं व्यर्थमेव। योग्यः पुत्रः पौरुषेण स्वयं जीवति । पित्रार्जितं न काङ्क्षति । अयोग्यः पित्रार्जितं भूरि दत्तमपि नाशयति । अर्थात् पुत्राः योग्याः कर्तव्याः इत्यर्थः।

४. पाठ्यभागं पठित्वा समाधानानि लिखन्तु ।

अ. समर्थः अधः पतति चेत् किं करोति ?

आ. असमर्थः अधः पतति चेत् किं करोति ?

इ. कः कीर्तिम् आप्नोति ?

ई. कस्य जन्म सार्थकं भवति ?

उ. सिंहः मृगराजः इति पदं कथं प्राप्तवान् ?

ऊ. पराक्रमस्य कः हेतुः न भवति ?

SCERT TELANGANA

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. स्वीयरचना



१. समर्थेन सम्बद्धान् श्लोकभावान् लिखन्तु ।
२. समर्थाः किं किं कार्यं साधयितुं शक्नुवन्ति ?
३. अस्मात् पाठात् भवान् कीदृशीं नीतिम् अवगतवान् ?
४. पाठे समर्थान् अधिकृत्य ज्ञातवन्तः खलु ! भवतः परिचितान् समर्थान् अधिकृत्य लिखन्तु ।

### आ. सर्जनात्मकव्यक्तीकरणम्



१. सिंहमधिकृत्य एकां कथां स्वयं लिखन्तु ?
२. पाठस्थान् श्लोकान् आधारीकृत्य नीतिवाक्यानि लिखन्तु ।
३. अधः दत्तानि वाक्यानि पठन्तु । तानि संस्कृतेन अनुवदन्तु ।

1. ఉదయం తొందరగా నిద్ర లేవండి.

   ..................................................................

2. ఇంట్లో పాఠాలను చక్కగా చదవండి.

   ..................................................................

3. దారిలో ఎల్లప్పుడు ఎడమవైపు నడవండి.

   ..................................................................

4. మంచి వారితో స్నేహం చెయ్యండి.

   ..................................................................

5. సరియైన సమయంలో భోజనం చెయ్యండి.

   ..................................................................

### इ. प्रशंसा



१. गोष्ठीषु, उत्सवेषु केऽपि बालाः गीतं गायन्ति अथवा अभिनयं कुर्वन्ति चेत् तान् भवन्तः कथम् अभिनन्दन्ति ?
२. कश्चन समर्थः छात्रः स्वसामर्थ्येन विजयं प्राप्तवान् । तं प्रधानाचार्यः कथम् अभिनन्दति ?

SCERT TELANGANA

## III. भाषांशाः

### अ. पदजालाभिवृद्धिः



१. उदाहरणानुसारं वचनपरिवर्तनं कुर्वन्तु ।

उदा- छात्रः पाठशालां गच्छति ।
छात्रौ पाठशालां गच्छतः ।
छात्राः पाठशालां गच्छन्ति ।

अ. बालकः श्लोकं वदति ।

आ. वृक्षः छायां यच्छति ।

इ. उपाध्यायः पाठं बोधयति ।

ई. सोदरः कथां लिखति ।

उ. चोराः कारागारं प्रविशन्ति ।

२. उदाहरणानुसारं पदनिर्माणं कुर्वन्तु ।

**उदा - न हेतुः - अहेतुः** **उदा - न अवसरः - अनवसरः**

| | |
|---|---|
| अ. न सत्यम् | ई. न अधिकारः |
| आ. न कारणम् | उ. न अन्तः |
| इ. न हितम् | ऊ. न इष्टम् |

३. अधः दत्तानि पदानि उपयुज्य वाक्यानि निर्मान्तु ।

| | | | |
|---|---|---|---|
| अ. समर्थः | आ. दूरम् | इ. प्रथितः | ई. गायन्ति |
| उ. सर्वत्र | ऊ. दुर्बलः | ऋ. वंशः | ॠ. स्वयमेव |

४. अधः दत्तानां पदानां सङ्घटनं विघटनं च कुर्वन्तु ।

अ. उत्पतति + आर्यः

इ. विक्रमार्जितम्

ई. नाभिषेकः

उ. मृगेन्द्रता

ऊ. सुहृत् + गणाः



SCERT TELANGANA

## आ. व्याकरणांशाः



१. उदाहरणानुसारम् अधः दत्तानां समासपदानाम् अर्थान् विचिन्त्य विग्रहवाक्यानि लिखन्तु ।

उदा - चन्द्रोदयः - चन्द्रस्य उदयः

अ. दशरथपुत्रः -

आ. संस्कृतप्रियः -

इ. गणिताध्यापकः -

ई. रामप्रतिभा -

ऊ. देशनायकः -

२. अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितानि पदानि परिशीलयन्तु।

अ. मृतः सर्वोऽपि पुनः जायते।

आ. प्रपञ्चे बहवः जायन्ते ।

इ. मणिः सर्वत्र शोभते ।

ई. आकाशे नक्षत्राणि शोभन्ते ।

उ. अहं मातरं वन्दे ।

ऊ. वयं भारतमातरं वन्दामहे ।

रेखाङ्कितानां क्रियापदानाम् आत्मनेपदिधातवः इति व्यवहारः अस्ति । अनुबन्धे दत्तस्य आत्मनेपदिनः लट्लकारस्य अभ्यासं कुर्वन्तु ।

३. अधः दत्तानि रिक्तस्थानानि पूरयन्तु ।

| | | |
|---|---|---|
| १. शोभते | .................. | .................. |
| .................. | .................. | शोभध्वे |
| .................. | शोभावहे | शोभामहे |

| | | |
|---|---|---|
| २. राजते | .................. | .................. |
| .................. | राजेथे | .................. |
| .................. | .................. | राजामहे |

SCERT TELANGANA

## IV. परियोजनाकार्यम्



१. सिंहसदृशानां पराक्रमवतां महात्मनां चरित्राणि सङ्कलय्य, तेषां विशेषताः पट्टिकारूपेण विलिख्य कक्ष्यायां प्रदर्शयन्तु ।

२. भवतः गृहपरिसरेषु जननीजनकयोः कीर्तिं वर्धितवतः बालकान् अधिकृत्य ज्ञात्वा, तेषां सफलताकारणानि विलिख्य कक्ष्यायां प्रदर्शयन्तु ।




### स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. पाठ्यांशश्लोकान् रागयुक्ततया पठितुं शक्नोमि । | आम् / न |
| २. पाठ्यांशश्लोकान् पठित्वा, अवगत्य प्रश्ननिर्माणं कर्तुं शक्नोमि । | आम् / न |
| ३. श्लोकभावान् स्वयं लेखितुं शक्नोमि । | आम् / न |
| ४. एकां कथां स्वीयवाक्यैः लेखितुं शक्नोमि । | आम् / न |

**धर्मः कीर्तिः द्वयं स्थिरम् ।**



SCERT TELANGANA

प्रथमः भागः

# कतमः योग्यः ?

पठन्तु, नन्दन्तु

कस्मिंश्चित् राज्ये देवमित्रः नाम महाराजः आसीत् । सुकेशः, विरथः, प्रतापः चेति तस्य त्रयः पुत्राः आसन् । गच्छता कालेन महाराजः वृद्धः जातः । तदा तस्य मनसि विचारः उत्पन्नः यत् त्रिषु पुत्रेषु कतमः युवराजपदे प्रतिष्ठापनीयः इति । एतदर्थं सः त्रयाणाम् अपि पुत्राणां परीक्षां कर्तुं निश्चितवान् ।

प्रथमं मन्त्रिभिः सह समालोचनं कृत्वा ज्येष्ठं पुत्रं सुकेशं तात्कालिकतया युवराजपदे नियुक्तवान् । कदाचित् कश्चन निर्धनः पुरुषः नूतनस्य युवराजस्य सुकेशस्य समीपम् आगतवान् । सः रुदन् उक्तवान् - ''युवराज ! अद्य राजमाता निर्धनानाम् अस्माकं कुटीराणाम् अग्निस्पर्शं कारितवती'' इति ।

एतत् श्रुत्वा कुपितः युवराजः सुकेशः उक्तवान् - ''रे दुष्ट ! राजमातुः विषये अपभाषणं कुर्वतः भवतः कियत् धैर्यम् ? गच्छतु इतः । तस्याः विरुद्धम् एकं शब्दम् अपि श्रोतुम् अहं नेच्छामि । पुनः यदि एतादृशम् अपभाषणं करिष्यति तर्हि भवतः जिह्वां कर्तिष्यामि'' इति ।

एतस्याः घटनायाः अनन्तरं महाराजः द्वितीयं पुत्रं विरथं तात्कालिकतया युवराजपदे नियुक्तवान् । पुनः कदाचित् कश्चन शिल्पकारः युवराजस्य समीपम् आगतवान् । सः - ''युवराज! मया काचित् विशिष्टा मूर्तिः आरचिता आसीत् । अद्य अमात्यः तां मूर्तिं दृष्टवान् । अनन्तरं सः 'अस्माकं राज्ये महाराजस्य मूर्तिं विना अन्या कापि मूर्तिः न स्थापनीया' इति वदन् तां जले प्रक्षिप्तवान् । मदीयः मासात्मकः परिश्रमः व्यर्थः जातः इति वदन् उच्चैः रुदितवान् ।

एतत् श्रुत्वा युवराजः विरथः नितरां खिन्नः । तथापि सः स्वस्य अमात्यस्य विरोधं कर्तुम् अशक्नुवन्, तस्याः मूर्तेः मूल्यं राज्यस्य कोशागारतः तस्मै शिल्पकाराय दापितवान् । शिल्पकारः सन्तोषेण प्रतिगतवान् । तत्पश्चात् महाराजः तृतीयं पुत्रं प्रतापं युवराजपदे नियुक्तवान् ।

अथ कदाचित् कश्चन जनः उच्चैः रुदन् राजभवनम् आगतवान् । सः युवराजस्य प्रतापस्य चरणयोः पतित्वा निवेदितवान् - ''युवराज! देशे महत् अन्याय्यं प्रचलति । मया यद्यपि प्रतिवर्षमिव महाराजाय करः दत्तः अस्ति, तथापि (करदानात् अनन्तरमपि) महाराजः देवमित्रः पुनः करम् इच्छति । अहं ''करं दातुं न शक्नोमि इति उक्तवान् । तथापि महाराजः मां निर्दयं ताडितवान्'' इति ।

युवराजः प्रतापः तस्य वचनानि शान्ततया श्रुतवान् । निरुद्विग्नः सन् तस्याः घटनायाः परिशीलनं कृतवान् । अनन्तरं मन्त्रिणम् आदिष्टवान् - ''महाराजः देवमित्रः विना कारणं निर्धनं जनं दण्डितवान् अस्ति । अतः सोऽपि दण्डनम् अर्हति । अवश्यं सः ताडनेन दण्डनीयः'' इति।



युवराजस्य निर्णयं श्रुत्वा महाराजः देवमित्रः अतीव सन्तुष्टः । सः उक्तवान् - ''पुत्र ! धन्यः भवान् । यतः अपराधिनं पितरमपि दण्डयितुम् उद्युक्तः । वस्तुतः सः एव उत्तमः राजा, यः अपराधिनं निस्सङ्कोचं दण्डयति'' इति ।

अनन्तरं च महाराजः तं प्रतापमेव युवराजपदे प्रतिष्ठापितवान् । गच्छता कालेन प्रतापः महाराजः भूत्वा बहुकालं न्याय्येन मार्गेण राज्यपालनं कृतवान् ।

SCERT TELANGANA

द्वितीयः भागः

# २. मृद्विनायकः

चित्रं पश्यन्तु, विचिन्त्य वदन्तु



**प्रश्नाः**

१. चित्रे के के सन्ति ? ते किं कुर्वन्ति ?
२. चित्रं दृष्ट्वा किम् अवगच्छन्ति ?
३. चित्रं कं विषयं बोधयति ?
४. चित्रे ते किमर्थं विग्रहान् निर्मान्ति ?

**उद्देश्यम्** - विनायकचतुर्थीमहोत्सवस्य विशेषतायाः ज्ञापनम्। पर्यावरणसंरक्षणविषये छात्राणां जागरणम् ।

**छात्रेभ्यः सूचनाः -**

१. पाठं पठन्तु । अनवगतानां पदानां वाक्यानाञ्च अधः रेखाङ्कनं कुर्वन्तु ।
२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।
३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।



SCERT TELANGANA

( विनायकचतुर्थ्याः विशेषताः अधिकृत्य एकस्यां दूरदर्शिन्यां व्याख्यात्री - शास्त्रज्ञयोर्मध्ये प्रचलिता चर्चा । )

व्याख्यात्री - सम्प्रति अस्माकं दूरदर्शनप्रसारकेन्द्रे आचार्यः शिवराममहोदयः समुपस्थितः । असौ तिरुपतिक्षेत्रस्थायां संस्कृतकलाशालायां विज्ञानं - संस्कृतम् इत्यस्य विभागस्य अध्यक्षः अस्ति । सम्प्रति अयं महोदयः ''गणेशचतुर्थ्याः वैज्ञानिकता'' इत्यस्मिन् विषये अमूल्यानंशान् वक्तुम् उपस्थितः अस्ति । ''स्वागतम् । नमस्ते महोदय !'' ।

आचार्यः - नमो नमः । प्रथमं सर्वेभ्यः ''विनायकचतुर्थीशुभाकाङ्क्षाः ।''

व्याख्यात्री - भारतदेशे जनाः गणेशस्य जन्मदिनम् उत्सवत्वेन कदा आरभ्य आचरन्तः सन्ति ?

आचार्यः - जनाः वैदिककालादारभ्य गणेशजन्मदिनम् उत्सवत्वेन आचरन्तः सन्ति ।

व्याख्यात्री - वीथीषु सामूहिकतया अस्य उत्सवस्य आचरणं कदा आरभ्य प्रचलति ?

आचार्यः - स्वातन्त्र्यात् पूर्वं जनेषु एकतासम्पादनार्थं प्रायः '1893' तमे वर्षे बालगङ्गाधरतिलकमहोदयेन सामूहिकोत्सवाचरणम् आरब्धमस्ति । तदा आरभ्य जनाः वीथीषु गणेशप्रतिमां संस्थाप्य विशेषरूपेण पूजनम् आरब्धवन्तः ।



व्याख्यात्री - अर्थात् तिलकमहोदयः एव एतेषामुत्सवानाम् आचरणस्य स्फूर्तिप्रदाता खलु !

आचार्यः - सत्यम्, तस्य स्फूर्त्या एव इदानीमपि सामूहिकोत्सवाचरणं निर्विघ्नतया प्रचलति ।

व्याख्यात्री - गणेशोत्सवाचरणे वैज्ञानिकता अस्तीति वदन्ति । किमिदं सत्यम् ?

आचार्यः - आम्,अस्माकं भारतीयोत्सवेषु सर्वेषु वैज्ञानिकता अस्त्येव । विशिष्य गणेशोत्सवे ........।

व्याख्यात्री - गणेशोत्सवाचरणे वैज्ञानिकता का ?


आचार्यः - उत्सवेऽस्मिन् गणेशप्रीतिकराणि एकविंशतिविधानि पत्राणि पूजनाय आनयन्ति । तानि पत्राणि वृक्षेभ्यः सम्पादयन्ति । आयुर्वेदानुसारं तेषां प्रभावः महान् अस्ति ।

व्याख्यात्री - एकविंशतिपत्रैः पूजनेन किं प्रयोजनं सिद्ध्यति ?

आचार्यः - पत्राणाम् आनयनसमये पूजासमये च स्पर्शनम्, आघ्राणं च भवति । जले तेषां निमज्जनेन जलमपि शुद्धं भवति । यतः तानि दिव्यौषधरूपाणि ।

व्याख्यात्री - उत्तमम् । किन्तु गणेशप्रतिमानां निमज्जनेन तदेव जलं कलुषितं भवति खलु !

आचार्यः - सत्यम् । केवलं रसायनवर्णमयप्रतिमानां निर्यासमृदा ( प्लास्टर् आफ् पारिस् ) निर्मितानां प्रतिमानां निमज्जनेन जलं प्रदूषितं भवति । तादृश्यः वर्णप्रतिमाः न क्रेतव्याः । मृत्तिकया निर्मिताः गणेशप्रतिमाः एव क्रेतव्याः ।



व्याख्यात्री - भवतु रसायनवर्णयुक्ताः प्रतिमाः कथं हानिं कुर्वन्ति इति विवृणोतु महोदय !

आचार्यः - रसायनवर्णाः नाम विविधरसायनैः विनिर्मिताः वर्णाः । तेषां कारणेन विविधाः चर्मरोगाः, नेत्रदोषाः हृद्रोगाश्च सम्भवन्तीति बहुधा निरूपितमस्ति ।

व्याख्यात्री - तर्हि मृद्विनायके के गुणाः सन्ति ?

आचार्यः - हरिद्रया, सिन्दूरेण, चन्दनेन एकविंशतिपत्रैश्च अलङ्कृतः पूजितश्च मृद्विनायकः जलम् औषधमयं करोति, परिसरान् शुद्धान् च करोति ।

व्याख्यात्री - अन्ततो गत्वा वयं सर्वे मृद्विनायकः एव श्रेष्ठः, सर्वत्र सर्वैरपि स एव स्थापनीयः पूजनीयश्च भवतीति ज्ञातवन्तः । एवम् अस्माकं प्रसारकेन्द्रमागत्य ''गणेशचतुर्थी - वैज्ञानिकता'' इत्यस्मिन् कार्यक्रमे स्वस्य अमूल्यसमयं प्रदाय, परिशोधितान् शास्त्रीयविषयान् च उक्तवते आचार्य शिवराममहोदयाय हार्दिकधन्यवादाः, ''गणेशचतुर्थीपर्वदिनशुभाशयाश्च'' ।

आचार्यः - धन्यवादः । अन्ते सर्वेभ्योऽपि लघुविज्ञापनमेकमस्ति यत् ''काश्चन स्वच्छन्दसंस्थाः मृद्विनायकमेव समर्थयन्ति, तस्य प्रचारं च कुर्वन्ति । सर्वकारः अपि प्रचारं कुर्वन्नस्ति । अतः प्रसारकेन्द्राणि वार्तापत्रिकाश्च मृद्विनायकपूजनविषये प्रचारं कुर्वन्तु'' इति प्रार्थये ।

''मृद्विनायकमर्चामः पर्यावरणं रक्षामः''।<br>''मृद्गणेशपूजनं प्राणिकोटिरक्षणम् ।।''

द्वावपि मिलित्वा - ''जय गणेश ! जय गणेश !''<br>सर्वेभ्योऽपि ''गणेशचतुर्थीशुभाशयाः''

'' तस्मात् शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।<br>ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ।।''

।। भगवद्गीता १६-२४ ।।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

#### अ. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. भारतीयाः उत्सवैः किं जानन्ति ?

२. पाठानुसारं पर्यावरणप्रदूषणस्य कारणं किमस्ति ?

३. मृद्विनायकस्थापनेन के लाभाः सन्ति ?

४. आगामिविनायकचतुर्थ्यां भवतां गृहपरिसरे कीदृशं विनायकं स्थापयिष्यन्ति ? कारणं वदन्तु ।

SCERT TELANGANA

## आ. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. पाठेऽस्मिन् विशिष्टपदानाम् अधः रेखाङ्कनं कुर्वन्तु ।

२. पाठं पठित्वा पाठे स्थितानि प्रश्नार्थकवाक्यानि एकत्र लिखन्तु ।

३. अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

संस्कृतभाषा विश्वे विशिष्य भारते अतिप्राचीनकालादारभ्य व्यवहारे अस्ति। भारतीयसंस्कृतिः संस्कृतभाषया संरचिता अस्ति । एषा प्राचीनसंस्कृतग्रन्थेषु संरक्षिता अस्ति । सा अद्यापि विश्वमानवकल्याणाय मार्गदर्शिका अस्ति । अतः उक्तं ‘‘भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा’’ इति ।

अ. भारतीयसंस्कृतिः कस्यां भाषायां उपलभ्यते ?

आ. संस्कृतभाषा कस्य मार्गदर्शिका ?

इ. अनुच्छेदस्य शीर्षिकां सूचयन्तु ।

ई. का भाषा बहोः कालात् भारतदेशे व्यवहारे अस्ति ?

४. पाठं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

अ. अधुना सर्वत्र कीदृशान् गणेशविग्रहान् स्थापयन्ति ?

आ. जलम् औषधमयं कथं भवति ?

इ. विनायकोत्सवे निर्यासमृद्विग्रहैः पर्यावरणप्रदूषणं कथं भवति ?

ई. तिलकमहोदयः किमर्थं गणेशोत्सवान् आरब्धवान् ?

# II. भावव्यक्तीकरणम् - सर्जनात्मकता

## अ. स्वीयरचना



१. कैः पदार्थैः विनायकप्रतिमाः निर्मातुं शक्नुमः ?

२. भवतां परिसरेषु मृद्विनायकस्य विषये भवन्तः कीदृशं प्रचारं दृष्टवन्तः ?

३. मृद्विनायकं विना इतोऽपि कीदृशाः विग्रहाः पर्यावरणाय हितकराः भवन्ति ?

४. विनायकविग्रहाणां निमज्जनं कुत्र कुत्र कुर्वन्ति ?

५. एतस्य पाठस्य विषये भवतः अभिप्रायः कः ?

SCERT TELANGANA

## आ. सर्जनात्मकव्यक्तीकरणम्



१. सहजपदार्थैः विनायकस्य प्रतिमां स्वयं निर्माय आनयन्तु ।

२. पर्यावरणदूषणं कैः कारणैः भवतीति पट्टिकां लिखन्तु ।

३. "मृद्विनायकमर्चामः - पर्यावरणं रक्षामः" एतादृशानि ध्येयवाक्यानि रचयन्तु ।

४. अधः दत्तानि वाक्यानि संस्कृतेन अनुवदन्तु ।

अ. రంగులను ఉపయోగించడం ఆరోగ్యానికి హానికరం.

आ. పండుగలు భారతీయసంస్కృతికి ఆధారాలు.

इ. నాకు ఇష్టమైన పండుగ వినాయకచవితి.

ई. పర్యావరణ సంరక్షణకోసం అందరూ కృషి చెయ్యాలి.

उ. మనం ఎల్లప్పుడు మంచి పనులనే చేద్దాం.

## इ. प्रशंसा



१. मृद्विनायकस्य पूजां कुर्वतः जनान् भवान् कथम् अभिनन्दति ?

२. भवतः सुहृदः पर्यावरण परिरक्षणार्थम् एकां योजनां कृतवन्तः । तदा भवान् किं करोति ?

# III. भाषांशाः

## अ. पदजालाभिवृद्धिः



१. मृत्तिकया किं किं निर्मातुं शक्यते इति रिक्तस्थानेषु लिखन्तु ।

मृत्तिकया — १............. — निर्मातुं शक्यते ।
मृत्तिकया — २............. — निर्मातुं शक्यते ।
मृत्तिकया — ३............. — निर्मातुं शक्यते ।
मृत्तिकया — ४............. — निर्मातुं शक्यते ।

SCERT TELANGANA

२. अधः दत्तानां पदार्थानां नामानि पाठात् चित्वा लिखन्तु । तानि उपयुज्य वाक्यानि लिखन्तु







१. ..........................................
२. ..........................................
३. ..........................................
४. ..........................................
५. ..........................................

३. किं वस्तु केन निर्मीयते इति ज्ञात्वा ' ✓ ' चिह्नेन अङ्कयन्तु ।

| वस्तु | कागदेन | पाषाणेन | सुधया | मृत्तिकया | वृक्षेण | रसायनैः | प्लास्तिकेन | लोहेन |
|---|---|---|---|---|---|---|---|---|
| आयुर्वेदौषधम् | | | | | | | | |
| अलोपति-औषधम् | | | | | | | | |
| पुस्तकम् | | | | | | | | |
| अङ्कनी | | | | | | | | |
| द्रोणी | | | | | | | | |
| जलकूपी | | | | | | | | |
| आसन्दः | | | | | | | | |
| इष्टकाः | | | | | | | | |

SCERT TELANGANA

४. कोष्ठके त्रिविधानि पदानि सन्ति । तानि क्त्वा, ल्यप्, तुमुन् प्रत्ययान्तानीति ज्ञात्वा, उचिते कोष्ठके लिखन्तु ।

| |
|---|
| लेखितुम्, उत्थाय, पठित्वा, कर्तुम्, कृत्वा, नीत्वा, गन्तुम्, प्रक्षाल्य, चलितुम्, धावितुम्, नत्वा, आनीय, हत्वा, आदाय, भवितुम्, लिखित्वा, श्रोतुम् |

| क्त्वा | तुमुन् | ल्यप् |
|---|---|---|
| | | |

५. एकैकस्मात् कोष्ठकात् एकं पदं चित्वा वाक्यानि रचयन्तु ।

१. ............................................ ।

२. ............................................ ।

३. ............................................ ।

SCERT TELANGANA

## आ. व्याकरणांशाः



१. अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितानि पदानि अवगच्छन्तु ।

अ. देवेषु विनायकः आदिपूज्यः । अर्थात् प्रथमः देवः ।

आ. धावनप्रतियोगितायां रमेशः द्वितीयं स्थानं प्राप्तवान् ।

इ. अहं षष्ठपाठस्थान् अभ्यासान् करोमि ।

उपरि रेखाङ्कितानां पदानां पूरणप्रत्ययान्तानि इति व्यवहारः । एतादृशानि पदानि सङ्ख्याभिः स्थानं बोधयन्ति ।

२. **चित्राणि पश्यन्तु । तत्र सङ्ख्या अपि अस्ति । सा सङ्ख्या वार्षिकपरीक्षायां तेषां स्थानानि सूचयति । सङ्ख्यायाः आधारेण चित्रगतस्य स्थानं सूचयन्तु ।**




३. **अधः दत्तानि सन्धिपदानि पठन्तु । विवरणम् अवगच्छन्तु ।**

उदा - प्रत्येकम् = प्रति + एकम् ( इ + ए = ये ) ( इ = य् )

मध्वरिः = मधु + अरिः ( उ + अ = व ) ( उ = व् )

मात्रंशः = मातृ + अंशः ( ऋ + अं = रं ) ( ऋ = र् )

उपरितनेषु उदाहरणेषु इ, उ, ऋ इति वर्णानां स्थाने य्, व्, र् इति वर्णाः आगताः सन्ति ।

एतानि यणादेशसन्धियुक्तानि पदानि ।

| |
|---|
| इ, ई, उ, ऊ, ऋ ,ॠ इत्येतेभ्यः वर्णेभ्यः असवर्णे अचि परे तेषां स्थाने क्रमेण य्, व्, र् इत्येते वर्णाः आदेशाः भवन्ति । |

अयं यणादेशसन्धिः इति उच्यते ।

४. **अधः दत्तानां सन्धिपदानां विभजनं कुर्वन्तु ।**

अ. अत्यन्तम् = .............. + ..................

आ. वृष्ट्यर्थम् = .............. + ..................

इ. शास्त्रेष्वभिज्ञः = .............. + ..................

ई. दध्योदनम् = .............. + ..................

उ. धात्रंशः = .............. + ..................

ऊ. सर्वेष्वयम् = .............. + ..................

SCERT TELANGANA

४. **अधः दत्तानां सन्धिपदानां योजनं कुर्वन्तु ।**

अ. इति + उवाच = ............................

आ. अति + अधिकम् = ............................

इ. बहु + अन्तरम् = ............................

ई. वधू + आगमनम् = ............................

उ. पितृ + अंशः = ............................

ऊ. मातृ + आगमनम् = ............................

५. **उदाहरणानुसारम् अधः दत्तानां समासपदानां विग्रहवाक्यानि लिखन्तु ।**

उदा -विनायकोत्सवः - विनायकस्य उत्सवः

अ. जनकात्मजा -

आ. गृहशोभा -

इ. सङ्गीतमाधुर्यम् -

ई. पवनतनयः -

उ. संस्कृतपुस्तकम् -

## IV. परियोजनाकार्यम्



१. **विविधानां विग्रहाणां निर्माणस्थानं गत्वा तत्रत्याः निर्मातारः कैः पदार्थैः विग्रहं निर्मान्ति ? कथं निर्मान्ति ? इत्यादिकं ज्ञात्वा निवेदिकां विलिख्य आनयन्तु, कक्ष्यायां श्रावयन्तु ।**



### स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. विनायकमहोत्सवस्य महत्त्वं विज्ञापयितुं शक्नोमि । | आम् / न |
| २. पाठं धारालतया पठितुं, पाठे विशिष्टपदानि अभिज्ञातुं च शक्नोमि । | आम् / न |
| ३. पाठ्यांशविषये मम अभिप्रायं स्वीयवाक्यैः लेखितुं शक्नोमि । | आम् / न |
| ४. मृद्विनायकं संस्थाप्य "पर्यावरणं रक्षणीयमिति" सर्वान् सूचयितुं शक्नोमि । | आम् / न |

**नास्ति सत्यसमं व्रतम् ।**

SCERT TELANGANA

# द्वितीयः भागः

# ३. रामप्पदेवालयः

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**



**प्रश्नाः**

१. चित्रे के के सन्ति ?

२. चित्रे किं प्रचलति ?

३. एतादृशसन्दर्भः कुत्र भवति ?

**उद्देश्यम् -**

१. पूर्वेषां शिल्पकाराणां नैपुण्यस्य ज्ञापनम् । तेन भारतीयकलाकाराणां विषये छात्रेषु आदरभावनायाः विकासः ।

**छात्रेभ्यः सूचनाः -**

१. पाठं पठन्तु । अनवगतानां पदानां वाक्यानां च अधः रेखाङ्कनं कुर्वन्तु ।

२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।

३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।

SCERT TELANGANA



(छात्राः अध्यापकं परितः आवृत्य तेनोक्तं विजयदशमीपर्वदिनस्य प्राशस्त्यं श्रुतवन्तः ।)

हे छात्राः ! आगामिसङ्क्रान्तिविरामदिवसेषु वयं सर्वे विज्ञानयात्रां गमिष्यामः । गृहे अनुमतिं लब्ध्वा आगच्छन्तु । वयं सर्वे मिलित्वा रामप्पदेवालयस्य सन्दर्शनार्थं गमिष्यामः । तत्र कठिनशिलास्तम्भेषु शिल्पिनां कलाकौशलं द्रष्टुं शक्नुमः ।




साधारणतः देवालयाः क्षेत्रस्वामिनः नाम्ना प्रसिद्धिं प्राप्नुवन्ति। वेङ्कटेश्वरालयः, श्रीकालहस्तीश्वरालयः, श्रीशैलमल्लीश्वरालयः, वेमुलवाडा राजराजेश्वरालयः इति देवालयाः तत्तद्देवानां नामभिः प्रसिद्धाः सन्ति। किन्तु रामप्पदेवालयः तु शिल्पिनाम्ना प्रसिद्धिं गतः ।



तेलङ्गाणाराज्ये वरङ्गलूजनपदं प्रधानकेन्द्रात् सप्तति कि.मी. (70 K.M) दूरे पालम्पेट ग्रामः अस्ति । ततः अनतिदूरे रामप्पदेवालयः अस्ति । तस्य नाम न केवलं तेलङ्गाणाराज्ये परन्तु भारते विश्वे च प्रसिद्धम् ।

१४ शताब्द्यां तदानीन्तनस्य राज्ञः गणपतिरुद्रदेवस्य प्रधानसेनानायकस्य रेचर्लरुद्रदेवस्य आध्यक्ष्ये एषः आलयः निर्मितः । स्थापत्यकलायां पूर्णप्रज्ञं रामप्पनामानम् आहूय तस्य नेतृत्वे शिल्पकलानैपुण्यस्य दृष्टान्तरूपेण लोकाय समर्पयितुमेव

एष देवालयः निर्मितः। नक्षत्राकारकबृहच्छिलायां मन्दिरमिदं नेत्रपर्व जनयति । प्रागभिमुखस्य अस्य गर्भालयस्य पुरतः द्वारत्रयशोभी मुखमण्टपः अस्ति । महामण्टपमध्ये स्निग्धशिलामयेषु कुड्यस्तम्भेषु भारत-भागवत-रामायणकथाः शिल्परचनाचातुर्यस्य निदर्शनायन्ते।



न केवलं गर्भालयकुड्येषु , मन्दिरस्य बहिरन्तःस्थितेषु सर्वेष्वपि कुड्येषु स्थापत्यकलायाः नैपुण्यं सन्दर्शकानां पर्यटकानां मनः आकर्षति । विविधनृत्य-नृत्तभङ्गीषु चित्रितानां शिल्पानां नयनमनोहराणि हर्म्याणि दृश्यानि देशस्य अस्य कलासंस्कृतेः वैभवम् अतितरां प्रकटयन्ति ।

महिषासुरमर्दिनी, गणेशः, भैरवः, नागिनी, मदनिका प्रभृतीनि शिल्पानि काकतीयशिल्पकलायाः केन्द्रस्थानानीव दृश्यन्ते ।

अत्रत्याः इष्टकाः जले प्लवमानाः तदानीन्तनायाः वैज्ञानिकतायाः वैशिष्ट्यं निरूपयन्ति । तत्र समीपस्थयोः कामेश्वर-कोटेश्वरदेवालययोः इष्टकाः अपि जले प्लवमानाः सर्वेषु सन्दर्शकेषु विस्मयं जनयन्ति ।

अस्य देवालयस्य कुड्येषु चित्रितं पेरिणीनृत्यं दृष्ट्वा प्रसिद्धः नाट्यशास्त्रज्ञः पद्मश्री बिरुदाङ्कितः नटराजरामकृष्णमहोदयः ''आन्ध्रनाट्यम्'' इति नाम्ना कमपि विशिष्टनाट्यप्रकारं संरच्य तस्य भरतनाट्य-कूचिपूडिनृत्ययोः समं स्थानं कल्पितवान् । तादृशशिल्पकलावैभवेन विराजमानः रामप्पदेवालयः अवश्यं सर्वैरपि द्रष्टव्यः इत्यवदत् ।





# एतानि कुर्वन्तु

## I. भावावगमनम् - प्रतिस्पन्दनम्

### अ. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. विहारयात्रा नाम का ?
२. रामप्पदेवालयसदृशानां देवालयानां नामानि वदन्तु ।
३. भवता कृतां विहारयात्राम् अधिकृत्य वदतु ।
४. विहारयात्रा करणीया चेत् पूर्वयोजना कथं करणीया ?

### आ. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. पाठं पठित्वा नूतनपदानाम् अधः रेखाङ्कनं कुर्वन्तु । तानि एकत्र लिखन्तु ।
२. अधः दत्तानि वाक्यानि पठन्तु । तेषां समानार्थकानि वाक्यानि पाठे अन्विष्य लिखन्तु ।

अ. సాధారణంగా దేవాలయాలు దేవతల పేర్లతో ప్రసిద్ధమౌతున్నాయి.
आ. నక్షత్రాకారంలో ఉన్న ఈ మందిరం కళ్ళకు ఆనందాన్ని కల్గిస్తుంది.
इ. శిల్పకళ యొక్క విశ్వరూపం సందర్శించే పర్యాటకుల మనస్సును ఆకర్షిస్తుంది.
ई. "ఆంధ్రనాట్యం" పేరుతో ఒక నాట్యప్రకారమును రచించి దానికి భరతనాట్య, కూచిపూడి నృత్యాలకు సమానమైన స్థానాన్ని కల్పించారు..

३. अस्मिन् पाठे स्थितानि सर्वनामपदानि चित्वा लिखन्तु ।
४. अधः दत्तं परिच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

वेमुलवाडा पुण्यक्षेत्रं करींनगरजनपदे अस्ति । सिरिसिल्लसमीपे एव वेमुलवाडा पुण्यक्षेत्रम् अस्ति । वेमुलवाडादिव्यक्षेत्रशिखरस्य दर्शनेन मनः प्रफुल्लं भवति । विकसितपद्मस्य तटाकस्य तटे शिल्पकलानिर्मितं राजराजेश्वरस्य मन्दिरं सुन्दरमस्ति । मन्दिरस्य उत्तरदिशि धर्मकुण्डम् अस्ति । धर्मकुण्डे स्नानेन सर्वपापनिवारणं भवतीति भक्तानां विश्वासः ।

अ. वेमुलवाडापुण्यक्षेत्रं कुत्र अस्ति ?
आ. राजराजेश्वरमन्दिरस्य उत्तरदिशि किं वर्तते ?
इ. कस्य दर्शनेन मनः प्रफुल्लं भवति ?
ई. सर्वपापनिवारणं केन भवति ?
उ. वेमुलवाडाक्षेत्रे स्थितस्य देवस्य नाम किम् ?

SCERT TELANGANA

५. पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

अ. छात्राः कस्य पर्वदिनस्य प्राशस्त्यं श्रुतवन्तः ?

आ. रामप्पदेवालयः कुत्र अस्ति ?

इ. रामप्पदेवालयः कस्य आध्यक्ष्ये निर्मितः ?

ई. आन्ध्रनाट्यं केन संरचितम् ?

उ. रामप्पदेवालयः केन नाम्ना प्रसिद्धः ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. स्वीयरचना



१. तेलंगाण प्रान्ते प्रसिद्धानां देवालयानां नामानि कानिचन लिखन्तु ।

२. रामप्पदेवालयस्य दर्शनेन प्राचीनकालिकं किं किं ज्ञातुं शक्नुमः ?

३. शिल्पानां चित्रणं देवालयानां कुड्येषु एव किमर्थं कुर्वन्ति ?

४. पाठ्यांशस्य विषये भवतः अभिप्रायः कः ?

### आ. सर्जनात्मकव्यक्तीकरणम्



१. पाठ्यांशं मित्राणां मध्ये प्रचलितसम्भाषणरूपेण लिखन्तु ।

२. अधः देवालयस्य चित्रमस्ति । तत् दृष्ट्वा पञ्चवाक्यानि स्वयं लिखन्तु ।



SCERT TELANGANA

३. **अधः दत्तानि वाक्यानि पठन्तु । तानि संस्कृतेन अनुवदन्तु । मञ्जूषातः सहायकं पदं चिन्वन्तु ।**

एकः एका, एकम्, त्रयः, चतस्रः, पञ्च

अ. ఒక బాలుడు కవితను రాస్తున్నాడు.

आ. ఒక బాలిక బొమ్మ వేస్తున్నది.

इ. ముగ్గురు విద్యార్థులు పాట పాడుతున్నారు.

ई. ఐదు నదులు ప్రవహిస్తున్నాయి.

उ. నలుగురు మహిళలు నడుస్తున్నారు.

ऊ. ఒక బస్సు వేగంగా వెళుతున్నది.

## इ. प्रशंसा



१. **भवतः बन्धुः कश्चन काशीयात्रां कृत्वा गृहमागतवान् । तस्य अनुभवान् भवान् कथं पृच्छति ?**

२. **भवान् राजा चेत् रामप्पसदृशेन स्थपतिना कीदृशानि कार्याणि कारयति ? तं कथं सम्मानयति ?**

# III. भाषांशाः

## अ. पदजालाभिवृद्धिः




१. **अधः दत्तानि बहुवचनानि एकवचने परिवर्तयन्तु ।**

| | **पुंलिङ्गे** | | **स्त्रीलिङ्गे** | |
|---|---|---|---|---|
| उदा | छात्राः | - छात्रः | छात्राः | - छात्रा |
| अ. | बालाः | - | बालाः | - |
| आ. | कवयः | - | मतयः | - |
| इ. | गुरवः | - | धेनवः | - |
| ई. | देवालयाः | - | विहारयात्राः | - |
| उ. | विद्यार्थिनः | - | विद्यार्थिन्यः | - |

SCERT TELANGANA

२. अधः दत्तस्य चक्रस्य साहाय्येन यात्रिकाः कुतः कुत्र गच्छन्तीति लिखन्तु ।




उदा - यात्रिकाः श्रीशैलं गच्छन्ति ।

यात्रिकाः श्रीशैलतः महानन्दिक्षेत्रं गच्छन्ति ।

३. अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितपदानि अवगच्छन्तु । तानि उपयुज्य स्वीयवाक्यानि रचयन्तु ।

अ. बालः चित्रं पश्यति किन्तु नावगच्छति ।

....................................... ।

आ. तिरुपतिदेवालयः सुप्रसिद्धः अस्ति ।

....................................... ।

इ. मम गृहे कुड्येषु देवानां चित्राणि सन्ति ।

....................................... ।

ई. भारतीयदेवालयेषु शिल्पानि बहूनि दृश्यन्ते ।

....................................... ।

३. उदाहरणानि पठन्तु। रेखाङ्कितपदानि अवगच्छन्तु ।

अ. रामेण सह सीता वनं गतवती ।

आ. कृष्णस्य मित्रं कुचेलः । कृष्णः तेन सह क्रीडति ।

उदाहरणे रेखाङ्कितं पदं तृतीयाविभक्तौ अस्ति ।

४. उदाहरणानुसारं वचनान्तराणि लिखन्तु ।

उदा - तेन - ताभ्यां - तैः (तृतीया विभक्तिः)

एतेन ................ ................

रामेण ................ ................


SCERT TELANGANA

## आ. व्याकरणांशाः



१. अधः दत्तानि चित्राणि पश्यन्तु । रेखाङ्कितानि पदानि अवगच्छन्तु ।





तालवृक्षः उन्नतः । कदलीवृक्षः वामनः । गजः स्थूलः । उष्ट्रः कृशः ।







पटोलः दीर्घः । शिग्रुः ह्रस्वः । विशालं क्रीडाङ्गणम् । लघुः मार्गः ।

उपरितनानि रेखाङ्कितानि पदानि एकस्य परिमाणं सूचयन्ति । एवं परिमाणं, वर्णं, स्वभावं सूचयन्ति पदानि विशेषणवाचकपदानि । विशेषणधर्मयुक्तानाम् अर्थानां बोधकानि पदानि विशेष्यवाचकानि । येषां पदानां विशेषः उच्यते तानि विशेष्यपदानि ।

२. मञ्जूषातः पदानि चित्वा वाक्यनिर्माणं कुर्वन्तु ।

| |
|---|
| उत्तमः, सुन्दरम्, हरितः, दीर्घा, |
| ह्रस्वम्, विशाला, नीलम्, वामनः |

३. अधः दत्तानि समस्तपदानि पठित्वा उदाहरणानुसारं विग्रहवाक्यानि रचयन्तु ।

उदा - उन्नतवृक्षः - उन्नतः च असौ वृक्षः च

दीर्घरज्जुः - दीर्घा च सा रज्जुः च

नीलोत्पलम् - नीलं च तत् उत्पलं च

अ. सुन्दरभवनम् -

आ. मधुरभाषा -

इ. मधुरफलम् -

ई. दीर्घदृष्टिः -

उ. विनीलगगनम् -

ऊ. उत्तमबालकः -

SCERT TELANGANA

४. **अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितानां पदानां विभक्तीः ज्ञात्वा रिक्तस्थाने लिखन्तु ।**

उदा - चत्वारः छात्राः कन्दुकेन क्रीडन्ति । तृतीयाविभक्तिः

अ. अम्बा मन्दिरं गच्छति । ........................

आ. भगिनी दर्वीभ्यां परिवेषणं करोति । ........................

इ. आञ्जनेयः सीतायै लङ्कां गतवान् । ........................

ई. वृक्षेभ्यः पर्णानि पतन्ति । ........................

उ. छात्रेषु सुरेशः उत्तमः । ........................

ऊ. संस्कृतप्रचारः सर्वैः कर्तव्यः । ........................

## IV. परियोजनाकार्यम्



१. **केषाञ्चन प्रसिद्धानां भारतीयविहारस्थानानां चित्राणि सङ्गृह्य, तेषां नामानि स्थलानि च विलिख्य प्रदर्शयन्तु ।**



### स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. विहारयात्रानुभवानां विवरणं कर्तुं शक्नोमि । | आम् / न |
| २. पाठं पठितुं, पाठे सर्वनामपदानि ज्ञातुं च शक्नोमि । | आम् / न |
| ३. भारतदेशे स्थितान् प्रसिद्धदेवालयान् अधिकृत्य लेखितुं शक्नोमि । | आम् / न |
| ४. पाठ्यांशं सम्भाषणरूपेण लेखितुं शक्नोमि । | आम् / न |

**विद्याधनं सर्वधनप्रधानम् ।**

SCERT TELANGANA

द्वितीयः भागः

# चिन्ता

पठन्तु नन्दन्तु



पूर्वस्मिन् काले कश्चन राजा तीव्रज्वरेण अत्यन्तं बाधितः । सः बहुकालपर्यन्तं शय्याधीनोऽभवत् । तदा राजवैद्याः आगत्य तस्य परीक्षाम् अकुर्वन् । तस्य नाडी तु सम्यक् एव स्पन्दते स्म । रक्तपीडाऽपि नास्ति, हृदयमपि सम्यक् कार्यं करोति । एवमपि अस्य ज्वरः कथमागतः? इति ते विस्मिताः अभवन् । राजा तु शय्यां न अत्यजत् ।

अन्यः वैद्यः आगत्य राज्ञः मनोव्याधिः अस्तीति ज्ञातवान् । तस्य रात्रौ निद्रा न भवति । आहारोऽपि तस्मै न रोचते । आरोग्यस्य अभावेन राज्यभारं कथं वोढुं शक्नोमि इति महती चिन्ता तस्य समुत्पन्ना । इयं चिन्ता कथं निवारणीया इत्येव तस्य समस्या अभवत् ।

तदा वैद्यः अवोचत् - हे राजन् ! तव व्याधिनिवारणाय एकम् औषधमस्ति । भवतः राज्ये निश्चिन्तस्य कस्यचन जनस्य युतकम् आनयन्तु । तत् युतकं भवान् धरतु । भवतः व्याधिः निवारितः भविष्यतीति ।

''युतकमेव खलु ! तत् किं महत्कार्यम् ? एकस्मिन् निमेषे तान्यत्र आगमिष्यन्तीति मत्वा मन्त्री चतुरः राजभटान् आहूय चतसृषु दिक्षु गत्वा देशेऽस्मिन् सर्वत्र अन्विष्य कस्यचन निश्चिन्तस्य युतकम् आनयन्तु'' इति आज्ञाप्य तान् प्रेषितवान् ।

राजभटाः ग्रामे ग्रामे भ्रमित्वा सर्वैः मिलितवन्तः । तान् उद्दिश्य ''भवन्तः निश्चिन्ताः किम् ?'' इति पृष्टवन्तः । किन्तु तैः निश्चिन्तः जनः न कोऽपि मिलितः । सर्वस्यापि या काचित् चिन्ता आसीदेव ।

एवम् अपरिणीतस्य विवाहचिन्ता, विवाहितस्य सन्तानाभावचिन्ता, सन्तानवतः सन्तानस्य पोषणचिन्ता, वामनस्य प्रांशुवृद्धिचिन्ता, स्थूलकायस्य लघुशरीरचिन्ता इत्येवं प्रकारेण सर्वेऽपि जनाः चिन्तावन्तः एव अदृश्यन्त ।

अन्ते एकस्मिन् ग्रामे कश्चन जनः वृक्षच्छायायां प्रशान्ततया हसन् नाट्यं कुर्वन् उल्लासेन वर्तमानः तैः दृष्टः । ते भटाः तत्र गत्वा तमुद्दिश्य, किं तव काचित् चिन्ताऽपि नास्ति वा ? इत्यपृच्छन् ।

किमर्थं चिन्ता ? सुखेन वृक्षच्छायासु पर्यटन् शाद्वलेषु विहरन् यदृच्छालब्धम् आहारं खादन् सम्यगस्मि । मम गृहं वा प्राङ्गणं वा किमपि नास्ति । ''मम न कापि चिन्ता'' इत्यवोचत् ।

तदा ''सन्दर्भोचितः एव जनः लब्धः'' इति ते राजभटाः सन्तुष्य ''त्वया यत् धार्यते तत् युतकं देहि'' एतदस्माकं राज्ञः आवश्यकमस्ति इत्यवोचन् । तदा सः मम युतकधार्यं नास्ति, गृहमेव यदा न भवति तदा युतकधार्यं किमर्थम् ? इति हसन् अवोचत् । राजभटाः मन्त्रिसमीपमागत्य एतं वृत्तान्तं सर्वं मन्त्रिणे निवेदितवन्तः । ''भोः निश्चिन्तः एकः जनः अस्माभिः दृष्टः । किन्तु तस्य युतकधार्यं नास्ति'' इति च अवोचन् । तदा वैद्यः ''राजन् ! अस्मिन् लोके जातस्य सर्वस्यापि जनस्य या काचित् चिन्ता भवत्येव । किन्तु सर्वैरपि अनिवार्यतया स्वकर्तव्यानि निर्वर्तनीयानि एव । अतः एतत् कथं भविष्यति, तत् कथं भविष्यतीति चिन्ता मास्तु । यत् कर्तव्यं भवतां तत् कर्तव्यं भवन्तः निर्वहन्तु । कदापि कस्यापि विषये चिन्ता न कर्तव्या'' इति सूचनां दत्तवान् ।

SCERT TELANGANA

## तृतीयः भागः

# ४. परिचिन्तयन्तु

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**




**प्रश्नाः**

१. चित्रे कानि कानि दृश्यन्ते ?

२. चित्रे बालिका किं करोति ?

३. चित्रस्थानां तेलुगुप्रहेलिकानां समाधानानि वदन्तु ?

**उद्देश्यम् - संस्कृतसाहित्याध्ययनेन रसास्वादनं भाषाकौशलसंवर्धनञ्च ।**

**छात्रेभ्यः सूचनाः -**


१. श्लोकान् पठन्तु । अनवगतानां पदानां वाक्यानाञ्च अधः रेखाङ्कनं कुर्वन्तु ।

२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।

३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।



SCERT TELANGANA



१. शक्तिं करोति सञ्चारे
शीतोष्णे मर्षयत्यपि ।
दीपयत्युदरे वह्निं
दारिद्र्यं परमौषधम् ॥

२. कृषीवलानां भुवि कालवर्षात्
अकालवर्षात् भिषजां प्रमोदः ।
यत्सस्यवृद्धिं कुरुते च पूर्वं
प्रजासु रोगप्रचयं द्वितीयम् ॥

३. द्वन्द्वोऽहं द्विगुरपि चाहं
मद्गेहे नित्यमव्ययीभावः ।
तत्पुरुष कर्मधारय
येनाहं स्यां बहुव्रीहिः ॥

SCERT TELANGANA



४. भारतं चेक्षुदण्डञ्च
सिन्धुम् इन्दुञ्च वर्णय ।
पादमेकं प्रदास्यामि
प्रतिपर्वरसोदयम् ॥



५. कमले कमला शेते
हरश्शेते हिमालये ।
क्षीराब्धौ च हरिश्शेते
मन्ये मत्कुणशङ्कया ॥



६. अम्बलिद्वेषिणं वन्दे
चिन्तकाय शुभप्रदम् ।
कूरगाय कृतत्रासं
पालनेऽतिप्रियं गवाम् ॥

SCERT TELANGANA

భావాః :

1. తిరగడానికి శక్తినిస్తుంది. శీతోష్ణాలను తట్టుకునే శక్తినిస్తుంది. జఠరాగ్నిని పెంపొందిస్తుంది. కనుక దారిద్ర్యం చాలా గొప్ప ఔషధం.

2. తగిన సమయానికి వర్షం పడితే రైతులకానందం. అకాల వర్షం వలన వైద్యుల కానందం, ఎందుకంటే సకాల వర్షంవలన పంట పండుతుంది. అకాల వర్షం వలన రోగాలు ఎక్కువగా వ్యాపిస్తాయి.

3. మా యింట్లో ఇద్దరమున్నాం. నాకు రెండు ఎద్దులు ఉన్నాయి. అయినా మా యింట్లో దారిద్ర్యం తాండవిస్తోంది. అందువలన ఓ యజమానీ! నాకు ఒక పని ఇప్పించు నేనా పని చేసి ధాన్యం కలవాడిని అవుతాను. కవి ఈ భావాన్ని సమాసాల ద్వారా చమత్కారంగా చెప్పారు.

4. ఒక కవికి ఒక పండితుడు ఇటువంటి సమస్యను ఇచ్చాడు. ఓ మహాకవి! నీకు "ప్రతిపర్వరసోదయం" అని పాదాన్ని ఇస్తున్నాను. దాన్ని ఆధారం చేసుకొని మహాభారతం, చెరుకుగడ, సముద్రం, చంద్రుడు వీటిని వర్ణించు. ఈ ప్రశ్నకు ప్రతిపర్వరసోదయం అనే ఒక పాదాన్ని సమాధానంగా ఇస్తాను అనేది సమాధానం. ఇక్కడ ప్రతిపర్వరసోదయమనగా భారతంలో 18 పర్వాలున్నాయి. ప్రతిపర్వమూ రసవంతంగా ఉందని అర్థం. 'చెరకుగడ'లో ప్రతికణుపు తీయగా ఉన్నదని భావం. సముద్రమునకు ప్రతిపర్వరసోదయమనగా ప్రతిపూర్ణిమకి సముద్రము ఉప్పొంగుతుందని భావం. చంద్రునికి ప్రతిపర్వరసోదయమంటే ప్రతిపూర్ణిమలోనూ చంద్రుడు 16 కళలతో ప్రకాశిస్తాడు అని భావం.

5. కమలమునందు లక్ష్మి ఉంటుంది. హిమాలయంలో శివుడు ఉంటాడు. విష్ణువు క్షీరసాగరంలో ఉంటాడు. కారణమేమంటే నల్లిబాధపడలేక కావచ్చు అని కవి చమత్కారం.

6. బలిచక్రవర్తికి శత్రువైనవాడు, తనను స్మరించేవారికి శుభం కలిగించేవాడు, కాళీయుని మర్దించినవాడు, ఆవులను రక్షించాలనే కోరిక కలవాడు అయిన శ్రీమహావిష్ణువును నమస్కరిస్తున్నాను. ఈ శ్లోకంలో అంబలి, చింతకాయ, కూరగాయ, పాలనేతి అనే తెలుగు పదాలను సంస్కృతార్థంలో ఉపయోగించటం చమత్కారాన్ని కలిగిస్తుంది.

## एतानि कुर्वन्तु

## I. भावावगमनम् - प्रतिस्पन्दनम्

### अ. श्रृण्वन्तु, विचिन्त्य वदन्तु



१. सरागभावं श्लोकान् पठन्तु ।

२. पाठ्यभागे कः श्लोकः भवते रोचते ? किमर्थम् ?

३. पाठ्यभागे प्रथमश्लोकस्य भावं लिखन्तु ।

४. गणद्वये उपविश्य प्रथमगणीयाः श्लोकं पठन्तु । द्वितीयगणीयाः भावं वदन्तु।

५. प्रथमश्लोके कवेः चमत्कारः कः ?

SCERT TELANGANA

## आ. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. पाठे स्थितानि चत्वारि ततोऽधिकाक्षरयुक्तानि पदानि पाठात् चित्वा अत्र लिखन्तु ।

२. पाठमाधारीकृत्य गुणान् '✓' इति चिह्नेन, दोषान् 'X' इति चिह्नेन अङ्कयन्तु।

अ. दारिद्र्यं जठराग्निं दीपयति । ( )
आ. सकालवर्षात् सस्यं फलति । ( )
इ. हिमालये शिवः न शेते । ( )
ई. दारिद्र्यं शीतोष्णे न मर्षयति । ( )
उ. चिन्तकाय शुभप्रदः विष्णुः । ( )

३. पाठमाधारीकृत्य कः चमत्कारः कस्मिन् श्लोके अस्तीति लिखन्तु ।

अ. मत्कुणबाधां सोढुमशक्ताः देवताः कमले, समुद्रे, पर्वते, शयनं कुर्वन्ति ।
आ. दारिद्र्यं परमौषधम् ।
इ. अहं बहुव्रीहिः स्याम् ।
ई. वृष्ट्या कृषकाः वैद्याः च मोदन्ते ।
उ. प्रतिपर्व रसोदयम् ।

४. अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

फल्गुनः मन्थनिग्रामे निवसति। सः तत्रत्यां प्रभुत्वपाठशालायां पठति । शिवः तस्य अनुजः । सः अपि तस्यामेव पाठाशालायां पठति । प्रज्ञा फल्गुनस्य सोदरी । एतस्यै कदलीफलं बहु रोचते। प्रतिदिनं पिता तस्यै तत्फलम् आनयति । एतेषां बालानां मातापितरौ उपाध्यायवृत्तिं कुरुतः ।

अ. फल्गुनः कस्मिन् ग्रामे निवसति ? तस्य अनुजः कः ?
आ. प्रज्ञायै किं फलं रोचते ? कः प्रतिदिनं फलम् आनयति ?
इ. प्रज्ञायाः ग्रामः कः ?
ई. फल्गुनः कुत्र पठति ?

५. पाठमाधारीकृत्य अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

अ. कदा कृषीवलानाम् आनन्दः जायते ?
अ. वैद्यानां प्रमोदः कदा भवति ?
इ. लक्ष्मीः कुत्र शेते ?
ई. क्षीरसागरे कः शेते ?
उ. विष्णोः आसक्तिः कुत्र अस्ति ?

SCERT TELANGANA

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. स्वीयरचना



१. अकालवर्षात् वैद्यानाम् आनन्दः किमर्थम् ?
२. दारिद्र्यं परमौषधम् इति कथने कवेः अभिप्रायः कः ?
३. समासपदानि स्वीकृत्य कविः कीदृशं चमत्कारश्लोकं लिखितवान् ?
४. कविः विष्णुं स्वप्रतिभया नमस्कृतवान् खलु! भवान् चेत् ज्येष्ठान् कथं नमस्करोति ?

### आ. सर्जनात्मकव्यक्तीकरणम्



१. वर्षसमये प्रकृतिः कथं भवतीति वर्णचित्रं विलिख्य प्रदर्शयन्तु ।
२. वर्षमुद्दिश्य पञ्चवाक्यानि लिखन्तु ।

### इ. प्रशंसा



१. ज्ञाताः संस्कृतसूक्तीः लिखन्तु ।
२. भवतां कक्ष्यायां चमत्कारश्लोकान् उत्तमतया पठितवन्तं छात्रं भवान् कथं प्रशंसति ?

## III. भाषांशाः

### अ. पदजालाभिवृद्धिः



१. अधः दत्तम् उदाहरणं पठन्तु । प्रश्नकरणविधानम् अवगच्छन्तु । ततः दत्तानां वाक्यानां प्रश्नान् लिखन्तु ।

उदा - हस्ते पञ्च अङ्गुल्यः सन्ति ।

हस्ते कति अङ्गुल्यः सन्ति ?

अ. कक्ष्यायां त्रिंशत् छात्राः सन्ति ।

................................ ।

आ. आकाशे बहूनि नक्षत्राणि सन्ति ।

................................ ।

SCERT TELANGANA

इ.	दशरथस्य चत्वारः पुत्राः सन्ति ।

................................ ।

ई.	संस्कृते पञ्च महाकाव्यानि सन्ति ।

................................ ।

उ.	कालिदासस्य सप्त काव्यानि सन्ति ।

................................ ।

२. अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितानि पदानि उपयुज्य वाक्यानि रचयन्तु ।

अ.	वयं गुरुपूजोत्सवं कदा आचरामः ?


आ.	भवतः आरोग्यं कथम् अस्ति ?

इ.	बासरक्षेत्रं कुत्र अस्ति ?

ई.	भवान् किमर्थं संस्कृतं पठति ?

उ.	श्रीरामः कीदृशः बालकः ?

३. यदा वृष्टिः भवति, तदा के के किं किं कुर्वन्तीति लिखन्तु ।



चटकः - ..........................................



मयूरः - ..........................................

SCERT TELANGANA



मण्डूकः - ........................................



धेनुः - ........................................



बिडालः - ........................................



छात्राः - ........................................

SCERT TELANGANA

## आ. व्याकरणांशाः



१. अधः दत्तानि वाक्यानि पठन्तु । तत्र रेखाङ्कितानि पदानि च पठन्तु ।

अ. गुरुः श्लोकान् वदति ।

छात्रः श्लोकान् <u>अनुवदति</u> ।

आ. धेनुः चरितुं गच्छति ।

वत्सः ताम् अनुगच्छति ।

इ. वयं गच्छामः ।

ते आगच्छन्ति ।

ई. भक्तः देवाय पुष्पहारम् अर्पयति ।

देवः भक्तस्य समस्यायाः परिहारं करोति ।

अत्र रेखाङ्किताः उपसर्गाः इति व्यवह्रियन्ते । उपसर्गाणां योजनेन पदानाम् अर्थेषु भेदः भवति ।

**२. अधः दत्तान् उपसर्गान् पदैः योजयित्वा वाक्यानि लिखन्तु ।**

दुर् , निस्
अनु, वि

अभिप्रायः, हारः
भवति, गच्छति, चलम्, सन्देहः

**३. अधः दत्तं परिच्छेदं पठित्वा कुण्डलीषु स्थितं पदं समुचितविभक्त्या परिवर्त्य वाक्यानि पूरयन्तु ।**

कार्त्तिकेयः...............(जनक) सह देवालयं गतवान् । तत्र ............... (आपण) बहूनि ...............(क्रीडनक) क्रीतवान् । तस्य .............(भगिनी) कृते तिलकं स्वीकृतवान् । ...........(स्यूत) स्थापितवान् । ...............(देवालय) प्रसादं स्वीकृत्य.............(गृह) गतवान् ।

**४. अधः दत्तानां समासानां विग्रहवाक्यानि पठन्तु, अवगच्छन्तु । विग्रहवाक्ये द्वयोः पदयोः सम्बन्धमवगच्छन्तु ।**

अ. शीतोष्णम् - शीतं च तत् उष्णं च - द्वन्द्वसमासः ।

आ. इक्षुदण्डः - इक्षोः दण्डः - षष्ठीतत्पुरुषसमासः ।

इ. प्रतिपर्व - पर्वणि पर्वणि - अव्ययीभावसमासः ।

SCERT TELANGANA

ई. क्षीराब्धिः - क्षीरस्य अब्धिः - षष्ठीतत्पुरुषसमासः ।

उ. अकालवर्षम् - काले वर्षं कालवर्षम् ।
न कालवर्षम् अकालवर्षम् । - नञ् तत्पुरुषसमासः ।

ऊ. हिमालयः - हिमस्य आलयः - षष्ठीतत्पुरुषसमासः ।

ऋ. रोगप्रचयः - रोगस्य प्रचयः - षष्ठीतत्पुरुषसमासः ।

ॠ. परमौषधम् - परमं च तत् औषधं च । - विशेषणपूर्वपद-कर्मधारयसमासः ।

## IV. परियोजनाकार्यम्



१. अन्यभाषास्थान् चातुश्लोकान् सङ्गृह्य भित्तिपत्रे विलिख्य पठन्तु, कक्ष्यायां च प्रदर्शयन्तु ।

२. भारतदेशे भिन्नप्रान्तेषु कथं वृष्टिः भवति ? तत्सम्बद्धान् विशेषांशान् ज्ञात्वा, भित्तिपत्रे विलिख्य, कक्ष्यायां प्रदर्शयन्तु ।



### स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. श्लोकान् रागयुक्ततया पठितुं शक्नोमि । | आम् / न |
| २. पाठं धारालतया पठितुं, श्लोकेषु स्थितानि चमत्कारवाक्यानि ज्ञातुं च शक्नोमि । | आम् / न |
| ३. कविः समासपदैः कथं चमत्कारं कृतवानिति वक्तुं शक्नोमि । | आम् / न |
| ४. वर्षासु दृश्यमानं प्रकृतिमनोहरचित्रं रचयितुं शक्नोमि । | आम् / न |


उदारचरितानां तु
वसुधैव कुटुम्बकम् ।

SCERT TELANGANA

तृतीयः भागः

# ५. सत्यनिष्ठा

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**



**प्रश्नाः**

१. चित्रे के के सन्ति ?

२. चित्रे कः दानं करोति ? कः स्वीकरोति ?

३. यः दानं करोति तं किं वदामः ?


**उद्देश्यम् -** 'सत्यम्' इति जीवनमूल्यस्य अवगमनम् ।

**छात्रेभ्यः सूचनाः -**

१. पाठं पठन्तु । अनवगतानां पदानां वाक्यानाञ्च अधः रेखाङ्कनं कुर्वन्तु ।

२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।

३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।



पुरा सत्यव्रतः नाम सत्यवादी राजा आसीत् । सः नियमेन विपणिमेलायाम् अवशिष्टद्रव्याणि भवन्ति चेत् तानि सायङ्काले समुचितमूल्यं दत्त्वा क्रीणाति स्म ।

एकदा मलिनवस्त्रधारी कृशकायः निर्धनः कश्चन कृषकः पुरातनीं पेटिकामेकां विपणिमेलायां विक्रेतुमानीतवान् । तस्याः पेटिकायाः मूल्यं सहस्ररूप्यकाणि इति निर्णयं कृत्वा सर्वान् ''क्रीणन्तु क्रीणन्तु'' इति आह्वयति स्म सः ।

''पेटिकायां किमस्ति'' इति जनाः कृषकं पृच्छन्ति स्म । सः ''मम दारिद्र्यं सर्वमस्यां पेटिकायामस्ति, इच्छन्ति चेत् सहस्ररूप्यकाणि दत्त्वा स्वीकुर्वन्तु'' इति समाधानं वदति स्म ।

तस्य कृषकस्य वचनं श्रुत्वा भीताः जनाः तमुन्मत्तं चिन्तयित्वा दूरं गतवन्तः । सायङ्कालः अभवत् । विपणिमेला समाप्ता । राज्ञः नियमानुसारम् अवशिष्टद्रव्याणि क्रेतुं भटाः कृषकस्य समीपम् आगत्य सहस्ररूप्यकाणि दत्त्वा दारिद्र्यपेटिकां क्रीतवन्तः । अनन्तरं राज्ञः समीपं नीतवन्तः ।

राजा तां पेटिकां स्वशयनमन्दिरे स्थापितवान् । मध्यरात्रे राजा गाढं निद्राति स्म । तदा नूपुरशब्दं श्रुत्वा राजा सहसा शयनादुत्थितवान् । अन्धकारे अस्पष्टतया स्वमन्दिरात् बहिः गच्छन्तीम् एकां स्त्रियं दृष्ट्वा 'भवती का ?' इति तामपृच्छत् ।

सा एवमुक्तवती ''हे राजन् ! अहं भवतः राज्यस्य लक्ष्मीः । भवान् धर्मस्वरूपः । इदानीं भवतः राजमन्दिरे दरिद्रदेवता अस्ति ।

SCERT TELANGANA

तस्मादहम् अत्र स्थातुं नेच्छामि । अतः एतत् स्थानं त्यक्त्वा गच्छन्ती अस्मि'' इति । राजा तद्वाक्यं श्रुत्वा स्मितमुखो भूत्वा तूष्णीं स्थितवान् ।

किञ्चित्कालानन्तरं स्वराजप्रासादात् बहिः गच्छन्तीम् अन्यामेकां दृष्ट्वा राजा तामेवमपृच्छत् । ''हे अम्ब! भवती का ?'' । तदा सा ''हे राजन् ! अहं भवतः दाननिष्ठा । यत्र लक्ष्मीः न भवति तत्र अहमपि न भवामि । अतः अहं गच्छामि'' इत्युक्त्वा सा निरगच्छत् ।

ततः यत्र राज्यलक्ष्मीः, दाननिष्ठा न भवतः तत्र अहमपि न भवामि इत्युक्त्वा धर्मदेवता अपि गतवती । राजा मौनमाश्रितवान् ।

अनन्तरं बहिर्गच्छन्तीम् अन्यां देवतां दृष्ट्वा ''अम्ब ! भवती का ?'' इति राजा पृष्टवान् । तदा सा उक्तवती - ''अयि राजन् ! अहं भवतः सत्यनिष्ठा । यत्र लक्ष्मीः, दाननिष्ठा धर्मदेवता च न सन्ति तत्राहं क्षणमपि स्थातुं न शक्नोमि । अतः भवन्तं त्यक्त्वा गच्छामि'' इति ।

तदा राजा तां ''तिष्ठतु, भवती सत्यनिष्ठा मम प्राणसमा । सत्यमेव मम बलं सर्वस्वं च । मम शरीरे यावत् पर्यन्तं प्राणाः भवन्ति तावत्पर्यन्तं मां त्यक्त्वा गन्तुमहं नाङ्गीकरोमि'' इत्यवदत् ।

राज्ञः कण्ठस्वरे गाम्भीर्यं ज्ञात्वा सत्यनिष्ठा तत्रैव स्थितवती । तद्विषयं ज्ञात्वा धर्मदेवता तामनुसृत्य दाननिष्ठा, तामनुसृत्य लक्ष्मीः च पुनरागताः ।

राजानं दृष्ट्वा लक्ष्मीः अवदत् ''हे राजन् ! यत्र सत्यधर्मदानगुणाः भवन्ति तत्र लक्ष्मीः तिष्ठति । नित्यक्रियाशीलिनः, प्रजारञ्जकपालनं कुर्वतः भवतः सान्निध्ये दारिद्र्यं क्षणमपि न तिष्ठतीति अवोचत् ।



राजा प्रातः शयनादुत्थाय दारिद्र्यपेटिकामानयन्तु इति भटान् आदिशत् । भटाः सर्वत्र अन्विष्य पेटिकामप्राप्य तद्विषयं राज्ञे न्यवेदयन् । दारिद्र्यं तद्राज्यादेव पलायितमिति मत्वा राजा अत्यन्तमानन्दम् अनुभूतवान् ।

SCERT TELANGANA

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

#### अ. श्रृण्वन्तु, विचिन्त्य वदन्तु



१. राजा विक्रयणानन्तरम् अवशिष्टद्रव्याणि क्रेतुं किमर्थं नियमं स्वीकृतवान् ? वदन्तु ।

२. विपणिमेलायां दारिद्र्यपेटिकां जनाः किमर्थं न क्रीतवन्तः ?

३. ''सत्यनिष्ठा'' पाठस्य सारांशं स्ववाक्यैः वदन्तु ।

४. ''सत्यवादी'' इत्युक्ते कः ? भवन्तः कीदृशाः ?

५. ''सत्यनिष्ठायाः अपेक्षया काऽपि श्रेष्ठा नास्ति'' इत्यस्य समर्थनं कुर्वन्तु ।

#### आ. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. अस्मिन् पाठे स्थितानि लङ्लकारयुक्तानि क्रियापदानि अन्विष्य लिखन्तु ।

२. अधः दत्तानि वाक्यानि कः कं प्रति उक्तवान् इति लिखन्तु ।

अ. अहं लक्ष्मीः, भवान् धर्मस्वरूपः ।

आ. मां त्यक्त्वा गन्तुमहं नाङ्गीकरोमि ।

इ. यत्र सत्यं, धर्मः, दानगुणाः च तत्र लक्ष्मीः तिष्ठति ।

ई. एतस्याः मूल्यं सहस्ररूप्यकाणि ।

३. अधः दत्तानां वाक्यानां ससन्दर्भ व्याख्यां कुर्वन्तु ।

अ. पेटिकायां किमस्ति ?

आ. कः ''तिष्ठतु'' इत्युक्तवान् ? कां प्रति उक्तवान् ?

इ. ''यत्र लक्ष्मीः न भवति तत्राहमपि न तिष्ठामि ।''

SCERT TELANGANA

४. अधः दत्तं परिच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

कृष्णानदी महाराष्ट्रस्य सह्याद्रिपर्वतेषु महाबलेश्वरे शिवालयस्थात् गोमुखात् लघुधारारूपेण उत्पन्ना । महाराष्ट्रस्य प्रान्ते ३१२ कि.मी. प्रवहन्ती, ततः कर्णाटकप्रान्ते भीमया तुङ्गभद्रया च मिलन्ती, ५०८ कि.मी. प्रवहन्ती मूसी-पालेरु-चन्द्रवङ्कानाम्नीः नदीः उपनदीत्वेन गृह्णन्ती आन्ध्रप्रदेशे ६२० कि.मी. प्रवहन्ती हंसलदीविप्रान्ते समुद्रे सम्मिलति ।

अ. कृष्णानदी कुत्र उत्पन्ना ?

आ. कृष्णानदी कुत्र समुद्रे सम्मिलति ?

इ. कृष्णानद्याः उपनद्यः काः ?

ई. कृष्णानदी आन्ध्रप्रदेशे कति कि.मी. दूरं प्रवहति ?

५. पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

अ. सत्यनिष्ठा अस्ति चेत् तत्र काः तिष्ठन्ति ?

आ. दारिद्र्यपेटिकाप्राप्तेः अनन्तरं के के गुणाः राजानं त्यक्त्वा गताः ?

इ. प्रातः राजमन्दिरे भटाः दारिद्र्यपेटिकां किमर्थं न अपश्यन् ?

ई. सत्यनिष्ठायाः श्रेष्ठत्वं किम् ?

उ. दारिद्र्यं कुत्र न तिष्ठति ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. स्वीयरचना



१. "आदर्शजनः" भवितुं के नियमाः पालनीयाः ? पट्टिकां लिखन्तु ।

२. दारिद्र्यपेटिकाक्रयणसन्दर्भे जनाः किमर्थं संशयं प्रकटितवन्तः ? विचिन्त्य लिखन्तु ।

३. राजा भटान् आदिशति । भवन्तं के के आदिशन्ति किं किम् आदिशन्ति इति लिखन्तु ।

४. यत्र क्रियाशीलता तत्र दारिद्र्यस्थानं न भवति किमर्थम् ?



SCERT TELANGANA

## आ. सर्जनात्मकव्यक्तीकरणम्



१. गुणसम्बद्धानि सूक्तिवाक्यानि घोषणवाक्यानि च लिखन्तु ।

२. पाठ्यांशं नाटकरूपेण लिखन्तु ।

३. ''सत्यनिष्ठा'' इति पाठ्यांशस्य अन्यशीर्षिकाः सूचयन्तु ।

४. अधः दत्तानि वाक्यानि संस्कृतेन परिवर्तयन्तु ।

अ. శారద పాఠశాలకు సైకిల్ పైన వెళుతుంది.

आ. అభిరామ్ పాఠశాలలో చేరాడు.

इ. ముఖ్యమంత్రి విమానంలో ఢిల్లీకి వెళ్ళాడు.

ई. తాతయ్య చెట్టుకు నీళ్ళు పోస్తున్నాడు.

उ. జంతువులు మానవులకు సేవ చేస్తున్నాయి.

## इ. प्रशंसा



१ . पाठशालायाम् ऋजुवर्तनान् छात्रान् भवान् कथमभिनन्दति ?

२. जन्मदिने निर्धनच्छात्राणां कृते यः पुस्तकानि वितरति तादृशं मित्रम् अभिनन्दतु ।

# III. भाषांशाः

## अ. पदजालाभिवृद्धिः



१. रेखाङ्कितपदानां समानार्थकपदानि लिखित्वा, तानि उपयुज्य वाक्यानि लिखन्तु।

अ. कृषकः सस्यरक्षणं करोति ।

आ. दरिद्रः अनेकानि कष्टानि अनुभवति ।

SCERT TELANGANA

इ. अस्माकं शरीरे अनेके अवयवाः सन्ति ।

ई. पेटिकायां बहूनि वस्तूनि सन्ति ।

२. **अधः दत्तं लक्ष्मीदेव्याः चित्रं परिशीलयन्तु । कोष्ठकस्थपदानि आधारीकृत्य लक्ष्मीदेव्याः आभरणानि कुत्र कुत्र सन्ति इति सूचयन्तु, लिखन्तु ।**

| | | | | |
|---|---|---|---|---|
| ग्रैवेयकम् | नूपुरम् | अङ्गुलीयकम् | काञ्ची | मणिहारः |
| नासाभरणम् | कङ्कणानि | कर्णलोलकम् | किरीटः | |



३. **विपणिमेलायां किं किं लभ्यते इति एकां पट्टिकां लिखन्तु ।**

४. **अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितानि पदानि उपयुज्य नूतनवाक्यानि लिखन्तु ।**

अ. कोकिलः इव काकः कृष्णः भवति ।

आ. संस्कृतं द्राक्षा इव मधुरा भाषा ।

इ. महाराजः हरिश्चन्द्रः इव सत्यवादी ।

५. **अधः कानिचन पदानि सन्ति । तेषां सम्बद्धानि पदानि चिन्तयित्वा लिखन्तु ।**

अ. महाराजः ................ .................. ...............

आ. लक्ष्मीदेवी ................ .................. ...............

इ. पाठशाला ……………… ………………… ………………

ई. गृहम् ……………… ………………… ………………

उ. देवालयः ……………… ………………… ………………

## आ. व्याकरणांशाः



**१. अधः दत्तानि सन्धिपदानि पठन्तु । विवरणम् अवगच्छन्तु ।**

शिशुश्शेते = शिशुस् + शेते ( स् + शे = श्शे ) (स् = श् )

मनश्चञ्चलम् = मनस् + चञ्चलम् ( स् + च = श्च ) (स् = श् )

उपरितनयोः उदाहरणयोः सकारस्य शकारेण योगे सकारस्य स्थाने शकारः आगतः ।

सच्चित् = सत् + चित् ( त् + चि = च्चि ) (त् = च् )

सुहृज्जगाम = सुहृद् + जगाम ( द् + ज = ज्ज ) (द् = ज् )

उपरितनयोः उदाहरणयोः तवर्गस्य चवर्गेण योगे तवर्गस्य स्थाने चवर्गः आगतः ।

एतानि श्चुत्वसन्धियुक्तानि पदानि ।

**सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः ।**

**अयं श्चुत्वसन्धिः इति उच्यते ।**

**२. अधः दत्तानां पदानां विभजनं कुर्वन्तु ।**

अ. हरिश्शेते = ……………………… + ……………………

आ. अन्यच्च = ……………………… + ……………………

इ. तपश्चर्या = ……………………… + ……………………

ई. उज्ज्वलम् = ……………………… + ……………………

उ. तच्च = ……………………… + ……………………

**३. अधः दत्तानां पदानां योजनं कुर्वन्तु ।**

अ. रामस् + च = ……………………

आ. कियत् + चिरम् = ……………………

इ. उद् + जीवनम् = ……………………

ई. सत् + चिद्रूपम् = ……………………

उ. सुकृत् + चर्वणम् = ……………………

SCERT TELANGANA

४. अधः दत्तानां समासपदानां विग्रहवाक्यानि उदाहरणानुसरं लिखन्तु ।

उदा - पीताम्बरः - पीतम् अम्बरं यस्य सः ।

अ. चक्रायुधः आ. दिव्ययशाः

इ. विशालहृदयः ई. श्रेष्ठमुखः

अत्र बहुव्रीहिसमासः । **यत्र अन्यपदार्थस्य प्राधान्यं भवति तत्र बहुव्रीहिसमासः ।**

५. अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितपदानि अवगच्छन्तु ।

अ. छात्रः कृष्णफलकं पश्यति । टिप्पणीं लिखति ।

उपरितनसमुच्चयवाक्ये कर्ता एकः एव । अतः पूर्वतनवाक्ये क्रियायां शतृप्रत्ययः विधीयते । तदा - "**छात्रः कृष्णफलकं पश्यन् टिप्पणीं लिखति ।**" इति वाक्यं भवति।

आ. अम्बा पुस्तकं पश्यन्ती कथां पठति ।

इ. युवकः दिनपत्रिकां पठन् चायं पिबति ।

ई. शिशुः गीतं श्रृण्वन् नन्दति ।

उपरितनवाक्येषु प्रथमक्रियारूपं शतृप्रत्ययान्तम् ।

६. अधः दत्तानि शतृप्रत्ययान्तपदानि उपयुज्य वाक्यानि रचयन्तु ।

अ. गच्छन्ती आ. खादन् इ. हसन्ती ई. धावन्

## IV. परियोजनाकार्यम्



१. एतादृशीम् अन्यां कथां विलिख्य कक्ष्यायां श्रावयन्तु ।



### स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. पाठसारांशं स्वीयवाक्यैः वक्तुं शक्नोमि । | आम् / न |
| २. पाठं धारालतया पठितुं शक्नोमि । | आम् / न |
| ३. पाठे स्थितानां वाक्यानां सन्दर्भव्याख्यां लेखितुं शक्नोमि । | आम् / न |
| ४. कथां स्वीयवाक्यैः लेखितुं शक्नोमि । | आम् / न |
| ५. पाठ्यांशकथां नाटकरूपेण प्रदर्शयितुं शक्नोामि । | आम् / न |

**सोत्साहानां नास्त्यसाध्यं नराणाम् ।**

SCERT TELANGANA

## मां दग्ध्वा खादन्तु.....।

### पठन्तु, नन्दन्तु

पूर्वं विजयनगरसाम्राज्ये कृष्णदेवरायः नाम प्रसिद्धः राजा आसीत् । तस्य आस्थाने बहवः प्रतिभाशालिनः आसन् । तेषु तेनालिरामकृष्णः बहु प्रसिद्धः । सः प्रत्युत्पन्नमतिः आसीत् । महत् कष्टम् आपतितं चेदपि सः अधीरः न भवति स्म । उपायेन तस्य परिहारं चिन्तयति स्म ।

एकदा सः वनौषधानि सङ्गृहीतुं वनं गतवान् । तस्मिन् काले वने नरभक्षकाः अपि भवन्ति स्म । रामकृष्णः ओषधिसस्यानि अन्विष्यन् वनस्य अन्तः बहुदूरं गतवान् । यदा सः गच्छन् आसीत् तदा केचन नरभक्षकाः अकस्मात् तस्य उपरि आक्रमणं कृतवन्तः । तं बद्ध्वा नायकस्य समीपं नीतवन्तः च ।

ते बहु भयानकाः आसन् । तेषां दर्शनतः रामकृष्णस्य यद्यपि भीतिः अभवत्, तथापि भीतिम् अप्रदर्शयन् सः तान् पृष्टवान् - 'भवन्तः के ? किमर्थं मां बद्ध्वा आनीतवन्तः ?'' इति । तदा नायकः उच्चैः हसन् उक्तवान् '' वयं नरभक्षकाः । इदानीं भवन्तं वयं भक्षयामः । भवान् बहु बुद्धिमान् इव दृश्यते । अतः भवते एकं वचनं वक्तुम् अवकाशं दद्मः वयम् । यदि भवता उक्तं सत्यं भवति तर्हि भवन्तम् उष्णजलेन पक्त्वा खादामः । यदि भवतः वचनम् असत्यं तर्हि भवन्तं साक्षात् अग्नौ दग्ध्वा खादामः । शीघ्रं वाक्यं वदतु'' इति ।

चतुरमतिः रामकृष्णः क्षणं यावत् चिन्तनं कृत्वा झटिति एकं वाक्यम् उक्तवान् । रामकृष्णस्य वचनं श्रुत्वा किङ्कर्तव्यतामूढाः ते नरभक्षकाः स्तब्धाः मौनं स्थितवन्तः । पश्चात् तं 'गच्छतु' इति उक्त्वा प्रेषितवन्तः । रामकृष्णः किम् उक्तवान् इति ज्ञातुं कुतूहलं स्यात् खलु भवताम् !

सः उक्तवान् ''भवन्तः माम् अग्नौ क्षिप्त्वा दग्ध्वा खादन्तु'' इति ।



यदि तस्य वचनं सत्यम् इति ते चिन्तयन्ति तर्हि तैः उष्णजलेन पक्त्वा खादनीयः सः । किन्तु यदि ते उष्णजलेन तं पक्त्वा खादन्ति तर्हि तस्य वचनम् असत्यं भवति । यदि असत्यम् इति निर्णीय अग्नौ क्षिप्त्वा दग्ध्वा ते तं खादन्ति तर्हि तस्य वचनं सत्यं भविष्यति ।

इत्थं स्ववचनेन एव बद्धाः ते नरभक्षकाः तं मुक्तवन्तः ।

कथमस्ति रामकृष्णस्य समयस्फूर्तिः ?

SCERT TELANGANA

चतुर्थः भागः

# ६. वसुधैव कुटुम्बकम्

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**




**प्रश्नाः**

१. अस्मिन् चित्रे किं दृश्यते ?

१. चित्रे जनाः किं किं कुर्वन्ति ?

२. चित्रं कं विषयं सूचयति ?

**उद्देश्यम् -**

१. कुटुम्बजीवनप्राधान्यस्य ज्ञापनम् ।

२. 'प्रसङ्गपाठः'इति प्रक्रियायाः ज्ञानसम्पादनम् ।

**छात्रेभ्यः सूचनाः -**

१. पाठं पठन्तु । अनवगतानां पदानां वाक्यानाञ्च अधः रेखाङ्कनं कुर्वन्तु ।

२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।

३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।

**(संस्कृतोन्नतपाठशालायाः स्वर्णोत्सवकार्यक्रमे अध्यक्षेण छात्रानुद्दिश्य कुटुम्बव्यवस्थायाः विषये कृतः प्रसङ्गपाठः ।)**

सभायै नमः । मञ्चे स्थिताः समादरणीयाः प्रधानाचार्याः, अन्यसदस्याः, उपाध्यायाश्च सर्वेभ्यः मम नमस्काराः । छात्राणां कृते शुभाशिषः ।



अस्माकं भारतदेशस्य अतीव विशेषता अस्ति । इयं भारतभूमिः, पुण्यभूमिः, कर्मभूमिः धर्मभूमिश्च । अस्माकं देशस्य संस्कृतिरपि विशिष्टा वर्तते । अस्यां संस्कृतौ कुटुम्बव्यवस्था शिखरायमाणा भवति । अस्माकं देशे जनानाम् एकतायाः कारणं कुटुम्बजीवनमेव । साधारणतया कुटुम्बे पितामहः, पितामही, पिता, माता, भ्रातरः, भगिन्यश्च मिलित्वा एकस्मिन् गृहे निवसन्ति । परस्परसाहाय्येन प्रेमपूर्वकवातावरणे ते गृहकार्याणि अन्यानि च कार्याणि समीचीनतया कुर्वन्ति ।

गृहे ज्येष्ठाः पितामहादयः अनुभवशालिनः सन्ति चेत् तेषाम् अनुभवज्ञानम् अस्माकम् अत्यन्तम् उपकाराय भवति । तेषां सूचनानुसरं कार्यं कृत्वा वयं सफलाः भवामः ।

अस्माकं गृहे यः कोऽपि रुग्णः भवति चेत् तं ज्येष्ठानां पितामहादीनां साहाय्येन स्वस्थं कर्तुं शक्नुमः । ते बालानां कृते प्रेमपूर्वकमृदुभाषणेन सान्त्वनं ददति । अत्यन्तसहनबुद्ध्या तेषां सेवां कुर्वन्ति । सम्पूर्णतया रक्षणभारं स्वीकृत्य स्वास्थ्यं सम्पादयन्ति च । तस्मादेव प्रतिगृहं ज्येष्ठाः अवश्यं निवसेयुः ।

समष्टिकुटुम्बजीवने सर्वेषां मध्ये आनन्दमयी प्रेमभावना भवति । या कापि समस्या कुटुम्बे भवति चेत् सामूहिकरूपेण तां समस्यां परिष्कर्तुम् अवकाशः तत्रैव भवति । कुटुम्बगौरवम् आर्थिकपुष्टिं च सम्पादयितुं समष्टिकुटुम्बानाम् आवश्यकता अस्ति ।

परस्परस्नेहः, परस्परसहकारः, सामूहिकरूपेण कार्यकरणं, सर्वैस्सहजीवनम् इत्यादयः मानवीयगुणाः, जीवनमूल्यानि च वयं समष्टिकुटुम्बजीवने एव पश्यामः । तदर्थं भारतीयाः समष्टिकुटुम्बजीवनं पालयितुम् अनुसर्तुं च प्रयत्नशीलाः भवेयुः ।



''गृहं जित्वा पुरं जयेत्'' इति लोकोक्तिमनुसृत्य यदि वयं कुटुम्बनिर्वहणं सम्यक् कुर्मः तर्हि सामाजिककार्याणि अपि विनाऽऽयासेन कर्तुं शक्नुमः । कुटुम्बनिर्वहणे अस्माकं ज्येष्ठाः साहाय्यं कुर्वन्ति । ते तदर्थम् आवश्यकसूचनाः अपि ददति । व्यक्तित्वविकासाय प्राथमिकं शिक्षणं वयं कुटुम्बात् एव प्राप्नुमः । परस्परमैत्री, सहिष्णुता, परस्परसहयोगः सर्वैस्सह सम्भूय कार्यकरणम् आत्मविश्वासः सुखदुःखयोः समदृष्टिः, त्यागः इत्यादिगुणाः कुटुम्बजीवनेन एव वयं प्राप्नुमः । ये कुटुम्बजीवने सफलाः भवन्ति ते सामाजिकजीवने समरसतां साधयन्तीति पूर्वजानामभिप्रायः ।

''उदारचरितानां तु वसुधैव कुटुम्बकम्'' इति सूक्तिमनुसृत्य सर्वे भाविभारतपौराः भवन्तः समष्टिकुटुम्बजीविनः सन्तः उदारचरिताः भवन्तु, भारतदेशस्य प्रतिष्ठां वर्धयन्तु च।

''वन्दे मातरम्'' ।

SCERT TELANGANA

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

#### अ. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. भारतदेशस्य विशेषता का ?

२. समष्टिकुटुम्बे के के भवन्ति ?

३. गृहे ज्येष्ठाः किं किं कुर्वन्ति ?

४. भवतः कुटुम्बे के के सन्ति ?

५. अद्यतनकाले कीदृशानि कुटुम्बानि जनाः इच्छन्ति ?

६. अद्यतनसमाजे कीदृशस्य कुटुम्बस्य आवश्यकता अस्ति ?

#### आ. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. पाठं पठित्वा बन्धुवाचकपदानि अन्विष्य लिखन्तु ।

२. पाठमाधारीकृत्य गुणान् '✓' इति चिह्नेन, दोषान् 'X' इति चिह्नेन अङ्कयन्तु।

अ. माता, जनकः, द्वौ पुत्रौ इत्येते भवन्ति चेत्
तत् समष्टिकुटुम्बम् । ( )

आ. 'कुटुम्बम्' इत्युक्ते पाठशालावातावरणम् । ( )

इ. अस्माकं देशे एकविधकुटुम्बव्यवस्था एव अस्ति । ( )

ई. कुटुम्बव्यवस्थया समाजः सम्यक् भवति । ( )

उ. कुटुम्बे सर्वेषां विचाराः समानाः भवन्ति । ( )

३. श्लोकं पठन्तु । प्रश्नान् रचयन्तु ।

श्लो - माता च पार्वती देवी
पिता देवो महेश्वरः ।
बान्धवाः शिवभक्ताश्च
स्वदेशो भुवनत्रयम् ॥

SCERT TELANGANA

५. **पाठं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

अ. कुटुम्बजीवनविषये स्थितां लोकोक्तिं वदन्तु, लिखन्तु ।
आ. समष्टिकुटुम्बे संवृद्धाः बालाः कथं भवन्तीति वदन्तु ?
इ. समष्टिकुटुम्बस्थाः कीदृशभावयुक्ताः भवन्ति ?
ई. भारतभूमिः कीदृशी ?
उ. एषः प्रसङ्गपाठः केन कृतः ? कदा कृतः ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. स्वीयरचना



१. समष्टिकुटुम्बजीवनेन के लाभाः भवन्तीति दशवाक्यैः लिखन्तु ।
२. भारतीयकुटुम्बव्यवस्था विश्वस्य आदर्शभूता - कथम् ?
३. कुटुम्बजीवनेन व्यक्तित्वविकासः कथं भवति ?
४. समष्टिकुटुम्बेन जायमानान् कांश्चन संस्कारान् लिखन्तु ।

### आ. सर्जनात्मकव्यक्तीकरणम्



१. समष्टिकुटुम्बस्य चित्रं लिखन्तु ।
२. समष्टिकुटुम्बविषये पञ्च वाक्यानि लिखन्तु ।
३. अधः दत्तानि वाक्यानि संस्कृतेन अनुवदन्तु ।

१. నానమ్మ ప్రతిరోజు తులసీపూజ చేస్తుంది.
२. తాతయ్య ఉదయం వాహ్యాళికి వెళ్తారు.
३. మా వదిన వంట బాగా చేస్తుంది.
४. గృహకార్యం (HOME WORK) విషయంలో నాన్న నాకు సహాయం చేస్తారు.
५. నేను అక్కతో, అన్నయ్యతో కలిసి ఆడుకుంటాను.

### इ. प्रशंसा



१. गृहे ज्येष्ठानां विषये गौरवं प्रदर्शयतः छात्रान् भवान् कथम् अभिनन्दति ?

## III. भाषांशाः


### अ. पदजालाभिवृद्धिः



१. कुटुम्बे के के भवन्ति ? केषाञ्चन बन्धूनां नामानि लिखन्तु ।

SCERT TELANGANA

२. अधः दत्तं चक्रम् आधारीकृत्य भवतः कुटुम्बजनानां नामानि वाक्यैः लिखन्तु ।




उदा - मम नाम दिवाकरः ।

मम पिता रामचन्द्रः ।

३. श्रृङ्खलामाधारीकृत्य वाक्यानि लिखन्तु ।




सूर्यवंशे दिलीपः अस्ति तस्य पुत्रः रघुः ।

४. अधः दत्तानि पदानि पठन्तु । अर्थानुसारं मेलयन्तु ।

| | क | ख |
|---|---|---|
| अ. | मातुलः | पुत्रस्य पुत्रः |
| आ. | पितामहः | पुत्र्याः पतिः |
| इ. | पौत्रः | मातुः सोदरः |
| ई. | दौहित्रः | पुत्र्याः पुत्रः |
| उ. | श्वशुरः | पितुः पिता |
| ऊ. | जामाता | भगिन्याः पुत्रः |
| ऋ. | भागिनेयः | अग्रजस्य पत्नी |
| ॠ. | प्रजावती | पत्न्याः / पतेः पिता |

## आ. व्याकरणांशाः



१. अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितपदानाम् अर्थान् विग्रहवाक्यानि अवगच्छन्तु ।

अ. कुचेलः <u>कृष्णाश्रितः</u> सन् सम्पदं प्राप्तवान् ।

आ. उपाध्यायः शिष्यस्य <u>पितृसमानः</u> ।

SCERT TELANGANA

इ. चारुदत्तः भूतबलिं ददाति ।
ई. दिलीपस्य राज्ये चोरभयं नासीत् ।
उ. संस्कृतच्छात्राः संस्कृतेन वदन्ति ।
ऊ. वस्त्रम् आतपशुष्कम् अस्ति ।

| | समासः | - | विग्रहवाक्यम् |
|---|---|---|---|
| १. | कृष्णश्रितः | - | कृष्णं श्रितः |
| २. | पितृसदृशः | - | पित्रा सदृशः |
| ३. | भूतबलिः | - | भूतेभ्यः बलिः |
| ४. | चोरभयम् | - | चोरात् भयम् |
| ५. | संस्कृतच्छात्राः | - | संस्कृतस्य छात्राः |
| ६. | आतपशुष्कम् | - | आतपे शुष्कम् |

उपरि विग्रहवाक्येषु विभक्तिं द्रष्टुं शक्नुमः । अर्थस्य आधारेण पदविभागसमये प्रथमं पदं विभक्तियुतं भवति । यत् पदं यया विभक्त्या अस्ति, तेन पदेन युक्तः तत्पुरुषसमासः तया विभक्त्या एव व्यवह्रियते ।

## २. अधः दत्तानां समासानां विग्रहवाक्यानि लिखन्तु ।

अ. अन्नबुभुक्षुः ____________________
आ. वेङ्कटेशसमः ____________________
इ. यूपदारु ____________________
ई. व्याघ्रभीतः ____________________
उ. देशभक्ताः ____________________
ऊ. कार्यनिपुणः ____________________

## ३. अधः दत्तानां विग्रहवाक्यानां समासपदानि लिखन्तु ।

अ. ग्रामं गतः -
आ. मात्रा समः -
इ. गवे हितम् -
ई. गजात् भीतः -
उ. देवस्य भक्ताः -
ऊ. चक्रे बन्धः -



SCERT TELANGANA

**४. अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितानि पदानि अवगच्छन्तु ।**

अ. यः प्रतिदिनं गृहकार्यं करोति सः एव उत्तमच्छात्रः ।

आ. यथा राजा तथा प्रजाः ।

इ. अहं ग्रामं गन्तुमिच्छामि । किन्तु वृष्टिः प्रतिबन्धिका अस्ति ।

ई. अहं प्रातः पञ्चवादने उत्थाय व्यायामं करोमि ।

उ. सम्यक् पठित्वा देशस्य सेवां करोमि ।

उपरितनवाक्येषु रेखाङ्कितानि पदानि ‘‘अव्ययानि’’ इति व्यवह्रियन्ते । अव्ययानां लिङ्ग - विभक्ति - वचनानि न भवन्ति । एतादृशानि अव्ययानि संस्कृते बहूनि सन्ति ।

**५. उपरितनवाक्येषु स्थितानि अव्ययपदानि उपयुज्य वाक्यानि रचयन्तु ।**

## IV. परियोजनाकार्यम्



**१. भवतां प्रान्तेषु स्थितानां समष्टिकुटुम्बानां वृत्तानि सङ्गृह्य कक्ष्यायां प्रदर्शयन्तु ।**

**२. समष्टिकुटुम्बेषु पितामही-पितामहाभ्याम् उक्तां कथामेकां सङ्गृह्य लिखन्तु, कक्ष्यायां श्रावयन्तु ।**



## स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. भारतदेशस्य वैशिष्ट्यं वक्तुं शक्नोमि । | आम् / न |
| २. पाठं पठित्वा बन्धुवाचकपदानि ज्ञातुं शक्नोमि । | आम् / न |
| ३. समष्टिकुटुम्बजीवनेन जायमानान् लाभान् उद्दिश्य लेखितुं शक्नोमि । | आम् / न |
| ४. समष्टिकुटुम्बस्य चित्रं रचयितुं शक्नोमि । | आम् / न |


**उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः ।**

SCERT TELANGANA

चतुर्थः भागः

# ७. भूमाता

**चित्रं पश्यन्तु, विचिन्त्य वदन्तु**



**प्रश्नाः**

१. चित्रे किं किं दृश्यते ?
२. रोगिणः अनारोग्यकारणं किं स्यात् ?
३. भूमिः किमर्थमेवं प्रदूषिता जाता ?

**उद्देश्यम्** - समस्तप्राणिनाम् आधारभूतायाः प्रकृतेः महत्त्वस्य अवबोधनम् । प्रकृतिरक्षणार्थं कालुष्यनिवारणार्थं च जागरूकतायाः विकासः ।

**छात्रेभ्यः सूचनाः -**

१. पाठं पठन्तु । अनवगतानां पदानां वाक्यानाञ्च अधः रेखाङ्कनं कुर्वन्तु ।
२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।
३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।



(तदैव पाठशालातः आगताः निखिलः, प्रज्ञा, नितीशः, मनोज्ञा, शिवः, प्रणवः, बृन्दावनी, लिखिता इत्यादयः सर्वे बालाः उत्साहेन क्रीडितुम् उद्यानवनं प्रविशन्ति। उल्लासेन क्रीडतां तेषां पुरतः भूमाता प्रत्यक्षीभूय कानिचन वचनानि श्रावयति । तेऽपि श्रद्धया शृण्वन्ति । तानि वचनानि वयमपि श्रद्धया शृणुमः ।)

हे बालाः! हे मम प्रियतनयाः! श्रुण्वन्तु मम वचनानि । सर्वप्राणिनाम् आधारभूता भूमिरहम् । भवताम् ऋतुशोभां दातुमहं सूर्यं परितः भ्रमामि । दिवारात्रं च कर्तुम् आत्मप्रदक्षिणं करोमि । एवं प्राणिनां जीवनं सुखमयं कर्तुं बहुकार्याणि करोमि । मम बहूनि नामानि सन्ति ।

'धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः ।
सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ॥' प्रभृतीनि ।

भवताम् अम्बा यथा भवतां सर्वविधम् उपचारं करोति तथा अहमपि करोमि । अत एव मां मानवाः परमप्रीत्या 'भूमाता' इति वदन्ति, नमस्कुर्वन्ति, स्तुवन्ति पूजां च कुर्वन्ति । किन्तु आधुनिके काले मम पोषणं रक्षणं वा न कुर्वन्ति । तद्विपरीतं च बहु कृत्वा मां प्रकृतिं च नाशयन्ति । तत्कथमिति चेत् कर्मागाराणां वर्धनेन, वृक्षाणां नाशनेन, नदीनां बन्धनेन, तटाकानां भञ्जनेन एवम् अन्यान्यदुष्कार्यैः मानवाः पञ्चभूतानि दूषयन्ति । वनसम्पदः नाशेन वन्यमृगाः ग्रामान् प्रविशन्ति । तेन जनाः भीताः पलायन्ते ।

अपि च मम उदरे गर्तान् कृत्वा विस्फोटकानि स्फोटयित्वा भवताम् अभिवृद्धिमार्गान् निर्मान्ति। इन्धनोत्पत्तिनिमित्तं नलकूपनिमित्तं मम उदरं खनित्रैः खनन्ति । तां बाधाम् असहमानायां मयि कम्पः जायते । तेन सर्वप्राणिनां नाशः सम्भवति ।






शान्त्यर्थम् उपयोज्यानि अण्वायुधानि युद्धेषु विना विवेकं क्षिपन्ति । सूर्यस्य किरणजालतः तीव्रतापः मम प्रियपुत्रेषु प्राणिषु साक्षात् पतति चेत् समस्याः भवन्तीति अहम् 'ओजोन्' नामकं रक्षणकवचं मां परितः कल्पितवती । तदपि मम रक्षणकवचं विविधविद्युद्यन्त्रैः विषवायुभिः च भञ्जयन्ति । शक्तिविहीनं च कुर्वन्ति।

प्रदूषणेन मयि विद्यमानम् उष्णत्वं तीव्ररूपं धृत्वा हिमालयपर्वतमपि द्रवीकरोति । तज्जलं समुद्रान् प्रविशति। तेन जलवर्धनेन समुद्रा अपि उत्पतन्ति । तेन जनजीवनं खेदमयं भवति ।

अधुना प्लास्तिकराक्षसः प्रपञ्चं नाशयति । अनारोग्यकराणां, वातप्रदूषकाणां प्लास्तिकस्यूतानाम् उपयोगः न करणीय इति पर्यावरणशास्त्रज्ञाः बहुधा उद्घोषयन्ति । तथापि केऽपि न श्रृण्वन्ति । कागदं, वस्त्रं, दारु इत्यादिकं मयि लीनं कर्तुं शक्नोमि । किन्तु प्लास्तिकस्य विलीनीकरणं सुकरं कार्यं नास्ति। तदर्थं लक्षाधिकवर्षाणि आवश्यकानि । इदानीं सर्वत्र प्लास्तिकपात्राणि सन्ति । तान्यपि सकृदुपयुज्य क्षिपन्ति । तेन वृष्टिजलं मयि न प्रविशति ।





हे भारतीप्रियपुत्राः! भाविपौराः! भवन्तः एतादृशानि अकृत्यानि न कुर्वन्तु। ''सुजलां सुफलां मलयजशीतलां सस्यश्यामलां मातरम्'' इति भवन्तः प्रतिदिनं गायन्ति। तत् श्रुत्वा परमानन्दं प्राप्नोमि । यतः भवन्तः मां तथा कुर्वन्तीति । मम संरक्षणं भवतामेव संरक्षणमिति मा विस्मरन्तु। अनुजातेभ्यः प्रकृतिसम्पदम् उपायनीकुर्वन्तु । तदा अहं भवतां सुचरितं तेभ्यः श्रावयामि ।

## एतानि कुर्वन्तु

### I. भावावगमनम् - प्रतिस्पन्दनम्

#### अ. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. वृक्षाणाम् उपयोगान् वदन्तु ।

२. भवद्भिः ज्ञातानि वन्यप्राणिनां नामानि वदन्तु ।

३. अश्रद्धा नाम का ? भवतां केषु विषयेषु श्रद्धा अस्ति ?

४. भूमौ निवसतां प्राणिनां नामानि वदन्तु ।

५. सूर्यस्य हानिकरकिरणानां नाम किम् ?

## आ. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



**१. पाठं पठित्वा पाठे कालुष्य(प्रदूषण)सम्बन्धीनि पदानि चित्वा लिखन्तु ।**

**२. अधः दत्तानि वाक्यानि पठन्तु । पाठस्य आधारेण दोषान् समीकुर्वन्तु ।**

उदा - दिवारात्रं कर्तुमहं सूर्यं परितः भ्रमामि ।

दिवारात्रं कर्तुमहम् आत्मप्रदक्षिणां करोमि ।

अ. प्राणिकोटिरक्षणार्थं 'कार्बनवायुः' नामकं रक्षणकवचं कल्पितवती ।

आ. वसुन्धरा इत्युक्ते आकाशः ।

इ. जलवर्धनेन समुद्राः अपि शान्ताः भवन्ति ।

ई. भूमौ प्लास्तिकस्य विलीनस्य सहस्रवर्षाणि आवश्यकानि ।

**३. अधः दत्तं परिच्छेदं पठित्वा प्रश्नान् रचयन्तु ।**

आधुनिकजीवनविधाने मानवेन साधितस्य शास्त्रसाङ्केतिकविकासस्य कारणेन वयं जीवने विजयं साधितवन्तः । तथापि समस्याः अस्मान् अनुसरन्ति । वाहनेभ्यः इन्धनानाम् अतीव उपयोगं कुर्मः । ऊर्जातैल (पेट्रोल्) सम्बद्धानाम् उपयोगेन कर्बनवायुः, गन्धकः इत्यादिविषवायवः वातावरणं सर्वम् आक्रमन्ति । किन्तु मानवाः तत्र प्रगतिमेव चिन्तयन्ति, विनाशं न चिन्तयन्ति ।

अ. ........................................ ?

आ. ........................................ ?

इ. ........................................ ?

ई. ........................................ ?

उ. ........................................ ?

**४. पाठमाधारीकृत्य अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु।**

अ. भूमेः नामानि वदन्तु, लिखन्तु ।

आ. वन्यप्राणिनः ग्रामेषु किमर्थं प्रविशन्ति ?

इ. प्लास्तिकस्य उपयोगेन समस्याः काः ?

ई. समुद्रे जलं किमर्थं कलुषितं भवति ?

## II. भावव्यक्तीकरणम् - सर्जनात्मकता

### अ. स्वीयरचना



१. भूमौ वृक्षाः न भवन्ति चेत् स्थितिः कथं भवतीति ऊहित्वा लिखन्तु ।

२. भवतां ग्रामे इदानीन्तनकाले पर्यावरणे आगतानि परिवर्तनानि उद्दिश्य लिखन्तु ।

३. भूकम्पः, जलप्रलयः इत्यादिषु प्रकृतिविपत्तिषु सम्भाव्यानि जनानां कष्टानि अधिकृत्य लिखन्तु ।

४. भवतां ग्रामस्थस्य तडागस्य प्रदूषणं कथं भवतीति लिखन्तु ।

५. भूमेः रक्षणाय के उपायाः आश्रयणीयाः ?

### आ. सर्जनात्मकव्यक्तीकरणम्



१. पर्यावरणपरिरक्षणविषये घोषणवाक्यानि रचयन्तु ।

उदा - हरिताः तरवः प्रगतेः निःश्रेणिकाः

सन्त्यजाम वृक्षान् संरक्षाम-रक्षाम ।

### इ. प्रशंसा



१. वृक्षान् रोपयन्तं स्वसुहृदं कथमभिनन्दति ?

२. पाठशालायां शुचिव्यवस्थासमित्या परिसरशुभ्रता संरक्षिता । तदा प्रधानोपाध्यायः तां समितिं कथम् अभिनन्दति ?

## III. भाषांशाः

### अ. पदजालाभिवृद्धिः



१. अधः दत्तानां पदानां विरुद्धार्थकानि पाठस्य आधारेण लिखन्तु । ततः स्ववाक्यैः तेषां प्रयोगं कुर्वन्तु ।

उदा - कष्टानि X सुखानि

बाल्ये रविः कष्टानि अनुभूय सम्यक् पठितवान् ।

इदानीं सुखानि अनुभवति ।

अ. बाधा

आ. अश्रद्धा


इ. न्यूनम्

ई. रक्षणम्

उ. विजयः

SCERT TELANGANA

## २. अर्थानाम् आधारेण पदानि लिखन्तु ।




उदा - खादितुम् उपयुज्यते - आहारः ।

अ. उद्याने क्रियते - .................. ।

आ. रामः रावणं कृतवान् - ........... ।

इ. फलानां खादनम् - ............... ।

ई. समस्यायाः निवारणम् - ...........।

उ. संक्षेपः - ..................... ।

## ३. अधः पदानि दत्तानि सन्ति । तेषाम् अर्थान् ज्ञात्वा वाक्यानि रचयन्तु ।

उदा - कृषिः - भूमिकर्षणादिकार्यम् - कर्षकः कृषिं करोति ।

अ. प्रतिज्ञा ............... .......................................

आ. वृक्षाः ............... .......................................

इ. प्रदूषणम् ............... .......................................

ई. विलीनम् ............... .......................................

## ४. अधः दत्तं श्लोकं पठन्तु ।

गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदिनी महिः ।
विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा ॥
जगती रत्नगर्भा च भूतधात्र्यब्धिमेखला ॥

## ५. उपरितनश्लोके विद्यमानान् शब्दान् तेषां भेदाधारेण विभज्य मञ्जूषासु लिखन्तु ।

| आकारान्तशब्दाः | इकारान्तशब्दाः | उकारान्तशब्दाः | ईकारान्तशब्दाः |
|---|---|---|---|
| | | | |

SCERT TELANGANA

## आ. व्याकरणांशाः



**१. अधः दत्तानि सन्धिपदानि पठन्तु । विवरणम् अवगच्छन्तु ।**

अ. वाक् + ईशः = वागीशः ( क् + ई = गी ) ( क् = ग् )

आ. अच् + अन्तः = अजन्तः ( च् + अ = ज ) ( च् = ज् )

इ. षट् + आननः = षडाननः ( ट् + आ = डा ) ( ट् = ड् )

ई. जगत् + ईशः = जगदीशः ( त् + ई = द ) ( त् = द् )

उ. अप् + जम् = अब्जम् ( प् + ज = ब्ज ) ( प् = ब् )

✦ उपरितनोदाहरणेषु क, च, ट, त, प इति वर्णानां स्थाने ग, ज, ड, द, ब इति वर्णाः आगताः सन्ति।

एतानि जश्त्वसन्धियुक्तानि पदानि ।

**२. अधः दत्तानां पदानां पदविभागं कुर्वन्तु । केषां वर्णानां स्थाने के वर्णाः आगता : इति लिखन्तु ।**

अ. दिगम्बरः = ............... + ...............

आ. जगदम्बा = ............... + ...............

इ. अजादिः = ............... + ...............

ई. षडादिः = ............... + ...............

उ. सुबन्तम् = ............... + ...............

**३. अधः दत्तानां पदानां योजनं कुर्वन्तु । केषां वर्णानां स्थाने के वर्णाः आगताः इति लिखन्तु ।**

अ. वाक् + देवता = ...............

आ. तत् + अपि = ...............

इ. सुप् + अन्तम् = ...............

ई. महत् + यशः = ...............

उ. अच् + वर्णः = ...............

SCERT TELANGANA

४. अधः दत्तानां पदानां योजनं कुर्वन्तु । सन्धिनामानि लिखन्तु ।

अ. शय्या + अधीनः = ............... ...............

आ. सन्दर्भ + उचितः = ............... ...............

इ. परम + औषधम् = ............... ...............

ई. अणु + आयुधानि = ............... ...............

उ. धर्मभूमिस् + च = ............... ...............

ऊ. जगत् + गुरुः = ............... ...............

५. अधः दत्तानां पदानां विभजनं कुर्वन्तु । सन्धिनामानि लिखन्तु ।

अ. शुभाशिषः = ........... + ...........=..................

आ. गणेशोत्सवः = ........... + ...........=..................

इ. वनौषधानि = ........... + ...........=..................

ई. मर्षयत्यपि = ........... + ...........=..................

उ. भगिन्यश्च = ........... + ...........=..................

ऊ. षड्दर्शनानि = ........... + ...........=..................

## IV. परियोजनाकार्यम्



१. भवतः ग्रामे प्रदूषणयुक्तान् प्रदेशान् ज्ञात्वा तत्रस्थं प्रदूषणम् अधिकृत्य निवेदिकां कृत्वा प्रदूषणनिवारणार्थम् उपायं रचयन्तु, कक्ष्यायां प्रदर्शयन्तु च ।



### स्वीयमूल्याङ्कनम्



| | |
|---|---|
| १. वृक्षाणाम् उपयोगं वक्तुं शक्नोमि । | आम् / न |
| २. पाठं धारालतया पठितुं शक्नोमि । | आम् / न |
| ३. वाक्यदोषान् संलक्ष्य निर्दुष्टं लेखितुं शक्नोमि । | आम् / न |
| ४. पर्यावरणपरिरक्षणसम्बद्धानि वाक्यानि लेखितुं शक्नोमि । | आम् / न |

**सतां हि जिह्वा गुणमेव भाषते ।**

SCERT TELANGANA

# शब्दरूपाणि

## १. इकारान्तः नपुंसकलिङ्गः 'वारि' शब्दः

| | | | |
|---|---|---|---|
| वारि | वारिणी | वारीणि | प्रथमा विभक्तिः |
| हे वारे-वारि | हे वारिणी | हे वारीणि | सम्बोधनप्रथमा विभक्तिः |
| वारि | वारिणी | वारीणि | द्वितीया विभक्तिः |
| वारिणा | वारिभ्याम् | वारिभिः | तृतीया विभक्तिः |
| वारिणे | वारिभ्याम् | वारिभ्यः | चतुर्थी विभक्तिः |
| वारिणः | वारिभ्याम् | वारिभ्यः | पञ्चमी विभक्तिः |
| वारिणः | वारिणोः | वारीणाम् | षष्ठी विभक्तिः |
| वारिणि | वारिणोः | वारिषु | सप्तमी विभक्तिः |

## २. चकारान्तः स्त्रीलिङ्गः 'वाक्' शब्दः

| | | | |
|---|---|---|---|
| वाक्-ग् | वाचौ | वाचः | प्रथमा विभक्तिः |
| हे वाक्-ग् | हे वाचौ | हे वाचः | सम्बोधनप्रथमा विभक्तिः |
| वाचम् | वाचौ | वाचः | द्वितीया विभक्तिः |
| वाचा | वाग्भ्याम् | वाग्भिः | तृतीया विभक्तिः |
| वाचे | वाग्भ्याम् | वाग्भ्यः | चतुर्थी विभक्तिः |
| वाचः | वाग्भ्याम् | वाग्भ्यः | पञ्चमी विभक्तिः |
| वाचः | वाचोः | वाचाम् | षष्ठी विभक्तिः |
| वाचि | वाचोः | वाक्षु | सप्तमी विभक्तिः |

एवं - ऋक् (कान्तिः), त्वक् इत्यादयः ।

SCERT TELANGANA

## ३. सकारान्तः नपुंसकलिङ्गः 'मनस्' शब्दः

| | | | |
|---|---|---|---|
| मनः | मनसी | मनांसि | प्रथमा विभक्तिः |
| हे मनः | हे मनसी | हे मनांसि | सम्बोधनप्रथमा विभक्तिः |
| मनः | मनसी | मनांसि | द्वितीया विभक्तिः |
| मनसा | मनोभ्याम् | मनोभिः | तृतीया विभक्तिः |
| मनसे | मनोभ्याम् | मनोभ्यः | चतुर्थी विभक्तिः |
| मनसः | मनोभ्याम् | मनोभ्यः | पञ्चमी विभक्तिः |
| मनसः | मनसोः | मनसाम् | षष्ठी विभक्तिः |
| मनसि | मनसोः | मनःसु/मनस्सु | सप्तमी विभक्तिः |

एवं तेजः, महः, रहः, अनः, रजः इत्यादयः।

## ४. दकारान्तः पुंलिङ्गः 'यद्' शब्दः

| | | | |
|---|---|---|---|
| यः | यौ | ये | प्रथमा विभक्तिः |
| यम् | यौ | यान् | द्वितीया विभक्तिः |
| येन | याभ्याम् | यैः | तृतीया विभक्तिः |
| यस्मै | याभ्याम् | येभ्यः | चतुर्थी विभक्तिः |
| यस्मात् | याभ्याम् | येभ्यः | पञ्चमी विभक्तिः |
| यस्य | ययोः | येषाम् | षष्ठी विभक्तिः |
| यस्मिन् | ययोः | येषु | सप्तमी विभक्तिः |

SCERT TELANGANA

## ५. दकारान्तः स्त्रीलिङ्गः 'यद्' शब्दः

| | | | |
|---|---|---|---|
| या | ये | याः | प्रथमा विभक्तिः |
| याम् | ये | याः | द्वितीया विभक्तिः |
| यया | याभ्याम् | याभिः | तृतीया विभक्तिः |
| यस्यै | याभ्याम् | याभ्यः | चतुर्थी विभक्तिः |
| यस्याः | याभ्याम् | याभ्यः | पञ्चमी विभक्तिः |
| यस्याः | ययोः | यासाम् | षष्ठी विभक्तिः |
| यस्याम् | ययोः | यासु | सप्तमी विभक्तिः |

## ६. दकारान्तः नपुंसकलिङ्गः 'यद्' शब्दः

| | | | |
|---|---|---|---|
| यत् | ये | यानि | प्रथमा विभक्तिः |
| यत् | ये | यानि | द्वितीया विभक्तिः |
| येन | याभ्याम् | यैः | तृतीया विभक्तिः |
| यस्मै | याभ्याम् | येभ्यः | चतुर्थी विभक्तिः |
| यस्मात् | याभ्याम् | येभ्यः | पञ्चमी विभक्तिः |
| यस्य | ययोः | येषाम् | षष्ठी विभक्तिः |
| यस्मिन् | ययोः | येषु | सप्तमी विभक्तिः |

SCERT TELANGANA

## ७. दकारान्तः त्रिलिङ्गः 'अस्मद्' शब्दः

| | | | |
|---|---|---|---|
| अहम् | आवाम् | वयम् | प्रथमा विभक्तिः |
| माम् (मा) | आवाम् (नौ) | अस्मान् (नः) | द्वितीया विभक्तिः |
| मया | आवाभ्याम् | अस्माभि: | तृतीया विभक्तिः |
| मह्यम् (मे) | आवाभ्याम् (नौ) | अस्मभ्यम् (नः) | चतुर्थी विभक्तिः |
| मत् | आवाभ्याम् | अस्मत् | पञ्चमी विभक्तिः |
| मम (मे) | आवयोः (नौ) | अस्माकम् (नः) | षष्ठी विभक्तिः |
| मयि | आवयोः | अस्मासु | सप्तमी विभक्तिः |

## ८. दकारान्तः त्रिलिङ्गः 'युष्मद्' शब्दः

| | | | |
|---|---|---|---|
| त्वम् | युवाम् | यूयम् | प्रथमा विभक्तिः |
| त्वाम् (त्वा) | युवाम् (वाम्) | युष्मान् (वः) | द्वितीया विभक्तिः |
| त्वया | युवाभ्याम् | युष्माभि: | तृतीया विभक्तिः |
| तुभ्यम् (ते) | युवाभ्याम् (वाम्) | युष्मभ्यम् (वः) | चतुर्थी विभक्तिः |
| त्वत् | युवाभ्याम् | युष्मत् | पञ्चमी विभक्तिः |
| तव (ते) | युवयोः (वाम्) | युष्माकम् (वः) | षष्ठी विभक्तिः |
| त्वयि | युवयोः | युष्मासु | सप्तमी विभक्तिः |

SCERT TELANGANA

# धातुरूपाणि

## परस्मैपदिधातुरूपाणि

### १. टुनदि - समृद्धौ

#### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| नन्दति | नन्दतः | नन्दन्ति | प्रथमपुरुषः |
| नन्दसि | नन्दथः | नन्दथ | मध्यमपुरुषः |
| नन्दामि | नन्दावः | नन्दामः | उत्तमपुरुषः |

#### भविष्यति लृट्

| | | | |
|---|---|---|---|
| नन्दिष्यति | नन्दिष्यतः | नन्दिष्यन्ति | प्रथमपुरुषः |
| नन्दिष्यसि | नन्दिष्यथः | नन्दिष्यथ | मध्यमपुरुषः |
| नन्दिष्यामि | नन्दिष्यावः | नन्दिष्यामः | उत्तमपुरुषः |

#### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अनन्दत् | अनन्दताम् | अनन्दन् | प्रथमपुरुषः |
| अनन्दः | अनन्दतम् | अनन्दत | मध्यमपुरुषः |
| अनन्दम् | अनन्दाव | अनन्दाम | उत्तमपुरुषः |

#### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| नन्दतु, नन्दतात् | नन्दताम् | नन्दन्तु | प्रथमपुरुषः |
| नन्द, नन्दतात् | नन्दतम् | नन्दत | मध्यमपुरुषः |
| नन्दानि | नन्दाव | नन्दाम | उत्तमपुरुषः |

SCERT TELANGANA

## २. रक्ष-रक्षणे

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| रक्षति | रक्षतः | रक्षन्ति | प्रथमपुरुषः |
| रक्षसि | रक्षथः | रक्षथ | मध्यमपुरुषः |
| रक्षामि | रक्षावः | रक्षामः | उत्तमपुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| रक्षिष्यति | रक्षिष्यतः | रक्षिष्यन्ति | प्रथम पुरुषः |
| रक्षिष्यसि | रक्षिष्यथः | रक्षिष्यथ | मध्यम पुरुषः |
| रक्षिष्यामि | रक्षिष्यावः | रक्षिष्यामः | उत्तम पुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अरक्षत् | अरक्षताम् | अरक्षन् | प्रथमपुरुषः |
| अरक्षः | अरक्षतम् | अरक्षत | मध्यमपुरुषः |
| अरक्षम् | अरक्षाव | अरक्षाम | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| रक्षतु, रक्षतात् | रक्षताम् | रक्षन्तु | प्रथमपुरुषः |
| रक्ष, रक्षतात् | रक्षतम् | रक्षत | मध्यमपुरुषः |
| रक्षाणि | रक्षाव | रक्षाम | उत्तमपुरुषः |

SCERT TELANGANA

## ३. ष्ठा-गतिनिवृत्तौ

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| तिष्ठति | तिष्ठतः | तिष्ठन्ति | प्रथमपुरुषः |
| तिष्ठसि | तिष्ठथः | तिष्ठथ | मध्यमपुरुषः |
| तिष्ठामि | तिष्ठावः | तिष्ठामः | उत्तमपुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| स्थास्यति | स्थास्यतः | स्थास्यन्ति | प्रथमपुरुषः |
| स्थास्यसि | स्थास्यथः | स्थास्यथ | मध्यमपुरुषः |
| स्थास्यामि | स्थास्यावः | स्थास्यामः | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अतिष्ठत् | अतिष्ठताम् | अतिष्ठन् | प्रथमपुरुषः |
| अतिष्ठः | अतिष्ठतम् | अतिष्ठत | मध्यमपुरुषः |
| अतिष्ठम् | अतिष्ठाव | अतिष्ठाम | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| तिष्ठतु, तिष्ठतात् | तिष्ठताम् | तिष्ठन्तु | प्रथमपुरुषः |
| तिष्ठ, तिष्ठतात् | तिष्ठतम् | तिष्ठत | मध्यमपुरुषः |
| तिष्ठानि | तिष्ठाव | तिष्ठाम | उत्तमपुरुषः |

SCERT TELANGANA

## ४. पत्- पतने

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| पतति | पततः | पतन्ति | प्रथमपुरुषः |
| पतसि | पतथः | पतथ | मध्यमपुरुषः |
| पतामि | पतावः | पतामः | उत्तमपुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| पतिष्यति | पतिष्यतः | पतिष्यन्ति | प्रथमपुरुषः |
| पतिष्यसि | पतिष्यथः | पतिष्यथ | मध्यमपुरुषः |
| पतिष्यामि | पतिष्यावः | पतिष्यामः | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अपतत् | अपतताम् | अपतन् | प्रथमपुरुषः |
| अपतः | अपततम् | अपतत | मध्यमपुरुषः |
| अपतम् | अपताव | अपताम | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| पततु, पततात् | पतताम् | पतन्तु | प्रथमपुरुषः |
| पत, पततात् | पततम् | पतत | मध्यमपुरुषः |
| पतानि | पताव | पताम | उत्तमपुरुषः |

SCERT TELANGANA

## ५. वह् - प्रापणे

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| वहति | वहतः | वहन्ति | प्रथमपुरुषः |
| वहसि | वहथः | वहथ | मध्यमपुरुषः |
| वहामि | वहावः | वहामः | उत्तमपुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| वक्ष्यति | वक्ष्यतः | वक्ष्यन्ति | प्रथमपुरुषः |
| वक्ष्यसि | वक्ष्यथः | वक्ष्यथ | मध्यमपुरुषः |
| वक्ष्यामि | वक्ष्यावः | वक्ष्यामः | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अवहत् | अवहताम् | अवहन् | प्रथमपुरुषः |
| अवहः | अवहतम् | अवहत | मध्यमपुरुषः |
| अवहम् | अवहाव | अवहाम | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| वहतु, वहतात् | वहताम् | वहन्तु | प्रथमपुरुषः |
| वह, वहतात् | वहतम् | वहत | मध्यमपुरुषः |
| वहानि | वहाव | वहाम | उत्तमपुरुषः |

SCERT TELANGANA

## ६. धृञ् - धारणे

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| धरति | धरतः | धरन्ति | प्रथमपुरुषः |
| धरसि | धरथः | धरथ | मध्यमपुरुषः |
| धरामि | धरावः | धरामः | उत्तमपुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| धरिष्यति | धरिष्यतः | धरिष्यन्ति | प्रथमपुरुषः |
| धरिष्यसि | धरिष्यथः | धरिष्यथ | मध्यमपुरुषः |
| धरिष्यामि | धरिष्यावः | धरिष्यामः | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अधरत् | अधरताम् | अधरन् | प्रथमपुरुषः |
| अधरः | अधरतम् | अधरत | मध्यमपुरुषः |
| अधरम् | अधराव | अधराम | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| धरतु, धरतात् | धरताम् | धरन्तु | प्रथमपुरुषः |
| धर, धरतात् | धरतम् | धरत | मध्यमपुरुषः |
| धराणि | धराव | धराम | उत्तमपुरुषः |

SCERT TELANGANA

## ७. मिल् - सङ्गमे

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| मिलति | मिलतः | मिलन्ति | प्रथमपुरुषः |
| मिलसि | मिलथः | मिलथ | मध्यमपुरुषः |
| मिलामि | मिलावः | मिलामः | उत्तमपुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| मेलिष्यति | मेलिष्यतः | मेलिष्यन्ति | प्रथमपुरुषः |
| मेलिष्यसि | मेलिष्यथः | मेलिष्यथ | मध्यमपुरुषः |
| मेलिष्यामि | मेलिष्यावः | मेलिष्यामः | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अमिलत् | अमिलताम् | अमिलन् | प्रथमपुरुषः |
| अमिलः | अमिलतम् | अमिलत | मध्यमपुरुषः |
| अमिलम् | अमिलाव | अमिलाम | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| मिलतु, मिलतात् | मिलताम् | मिलन्तु | प्रथमपुरुषः |
| मिल, मिलतात् | मिलतम् | मिलत | मध्यमपुरुषः |
| मिलानि | मिलाव | मिलाम | उत्तमपुरुषः |

SCERT TELANGANA

## ८. णश् - अदर्शने

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| नश्यति | नश्यतः | नश्यन्ति | प्रथम पुरुषः |
| नश्यसि | नश्यथः | नश्यथ | मध्यम पुरुषः |
| नश्यामि | नश्यावः | नश्यामः | उत्तम पुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| नशिष्यति | नशिष्यतः | नशिष्यन्ति | प्रथम पुरुषः |
| नशिष्यसि | नशिष्यथः | नशिष्यथ | मध्यम पुरुषः |
| नशिष्यामि | नशिष्यावः | नशिष्यामः | उत्तम पुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अनश्यत् | अनश्यताम् | अनश्यन् | प्रथम पुरुषः |
| अनश्यः | अनश्यतम् | अनश्यत | मध्यम पुरुषः |
| अनश्यम् | अनश्याव | अनश्याम | उत्तम पुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| नश्यतु,नश्यतात् | नश्यताम् | नश्यन्तु | प्रथम पुरुषः |
| नश्य,नश्यतात् | नश्यतम् | नश्यत | मध्यम पुरुषः |
| नश्यानि | नश्याव | नश्याम | उत्तम पुरुषः |

SCERT TELANGANA

# आत्मनेपदिधातुरूपाणि

## १. जनी-प्रादुर्भावे

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| जायते | जायेते | जायन्ते | प्रथमपुरुषः |
| जायसे | जायेथे | जायध्वे | मध्यमपुरुषः |
| जाये | जायावहे | जायामहे | उत्तमपुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| जनिष्यते | जनिष्येते | जनिष्यन्ते | प्रथमपुरुषः |
| जनिष्यसे | जनिष्येथे | जनिष्यध्वे | मध्यमपुरुषः |
| जनिष्ये | जनिष्यावहे | जनिष्यामहे | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अजायत | अजायेताम् | अजायन्त | प्रथमपुरुषः |
| अजायथाः | अजायेथाम् | अजायध्वम् | मध्यमपुरुषः |
| अजाये | अजायावहि | अजायामहि | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| जायताम् | जायेताम् | जायन्ताम् | प्रथमपुरुषः |
| जायस्व | जायेथाम् | जायध्वम् | मध्यमपुरुषः |
| जायै | जायावहै | जायामहै | उत्तमपुरुषः |

SCERT TELANGANA

## १०. वृतु - वर्तने

### वर्तमाने लट्

| एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|
| वर्तते | वर्तेते | वर्तन्ते | प्रथमपुरुषः |
| वर्तसे | वर्तेथे | वर्तध्वे | मध्यमपुरुषः |
| वर्ते | वर्तावहे | वर्तामहे | उत्तमपुरुषः |

### भविष्यति लृट्

| | | | |
|---|---|---|---|
| वर्तिष्यते | वर्तिष्येते | वर्तिष्यन्ते | प्रथमपुरुषः |
| वर्तिष्यसे | वर्तिष्येथे | वर्तिष्यध्वे | मध्यमपुरुषः |
| वर्तिष्ये | वर्तिष्यावहे | वर्तिष्यामहे | उत्तमपुरुषः |

### अनद्यतनभूते लङ्

| | | | |
|---|---|---|---|
| अवर्तत | अवर्तेताम् | अवर्तन्त | प्रथमपुरुषः |
| अवर्तथाः | अवर्तेथाम् | अवर्तध्वम् | मध्यमपुरुषः |
| अवर्ते | अवर्तावहि | अवर्तामहि | उत्तमपुरुषः |

### विध्याशिषोः लोट्

| | | | |
|---|---|---|---|
| वर्तताम् | वर्तेताम् | वर्तन्ताम् | प्रथमपुरुषः |
| वर्तस्व | वर्तेथाम् | वर्तध्वम् | मध्यमपुरुषः |
| वर्तै | वर्तावहै | वर्तामहै | उत्तमपुरुषः |

SCERT TELANGANA

# पदकोशः

**अ**

अतितराम् = అత్యధికముగా

अनतिदूरे = అతిదగ్గరలో

अनार्यः = నీచుడు

अनुजातेभ्यः = తరువాత వారి కొరకు

अनुसृतः = అనుసరించబడినది

**आ**

आघ्राणम् = వాసన చూడటం

आध्यक्ष्ये = అధ్యక్షతన

आर्यः = పూజ్యుడు

आवृत्य = చుట్టి

**इ**

इष्टकाः = ఇటుకలు

**उ**

उक्तवते = చెప్పినవాని కొరకు

उत्साहेन = ఉత్సాహంతో

**ओ**

ओषधिमयम् = ఓషధులతో కూడినది

**क**

करी = ఏనుగు

कलावैभवम् = కళయొక్క ఐశ్వర్యమును

कुड्यस्तम्भेषु = గోడల స్తంభములపై

कृशकायः = సన్నని శరీరంగల

क्षेत्रस्वामिनः = పొలము యజమానియొక్క

**ख**

खेदमयम् = బాధాకరమైన / దుఃఖముతో కూడియున్న

**ग**

गर्भालयस्य = దేవుని మూల విగ్రహము కల గది యొక్క

**ज**

जितम् = గెలువబడినది

ज्येष्ठः = పెద్ద

ज्ञातम् = తెలుసుకోబడినది

ज्ञातवन्तः = తెలుసుకొన్నాము/రు

**त**

तनया = కుమార్తె

**द**

दरिद्रः = నిర్ధనుడు

दारु = కట్టె

SCERT TELANGANA

दिवारात्रम् = పగలు రేయి
दुर्बलः = బలం లేనివాడు
दृष्टान्तरूपेण = ఉదాహరణగా
द्रव्याणि = వస్తువులు

**न**

निमज्जनेन = ముంచుట ద్వారా
नेत्रपर्व = కన్నులకు ఆనందాన్ని

**प**

परितः = చుట్టూ
परिवर्तिनि = మార్పు చెందుతున్న
पिकाः = కోకిలలు
पुरम् = నగరము
पूजनाय = పూజించుటకొరకు
पूर्णप्रज्ञाम् = పూర్తిజ్ఞానము కలవానిని
प्रकृतिः = స్వభావము
प्रागभिमुखस्य = తూర్పుముఖము గల
प्रथिताः = ప్రసిద్ధులు
प्रदूषितम् = కలుషితము
प्रियवादिनाम् = ఎదుటివారికి ఇష్టము కలిగేలా మాట్లాడేవారికి
प्लवमानाः = తేలేటువంటివిగా

**ब**

बली = బలం కలవాడు
बिरुदाङ्कितः = బిరుదు కలిగి ఉన్నవాడు
बहुधा = అనేక విధములుగా

**भ**

भटाः = సైనికులు
भीताः = భయపడినవారై

**म**

मलिनम् = మురికి
मञ्चे स्थितः = వేదికపైన కూర్చొన్నవాడు
मध्ये = మధ్యలో వచ్చు
मुखमण्टपः = మండపం యొక్క ముందు భాగము
मूर्ध्नि = తలపై
मूल्यम् = వెల / ధర

SCERT TELANGANA

मृगेन्द्रता = జంతువులకు రాజుగా ఉండటము (శాసకత్వము)

मृत्पिण्डपतनम् = మట్టి ముద్ద పడుట

र

रुग्णः = రోగి

व

वचनानि = మాటలు

वस्त्रधारी = బట్టలు ధరించినవాడు

वर्णमयप्रतिमाः = రంగులువేసిన విగ్రహములు / బొమ్మలు

वक्तुम् = చెప్పుటకు

वायसः = కాకి

विपणिमेला = సంత

विक्रेतुम् = అమ్మడానికి

वृष्टिजलम् = వాన నీరు / వర్షపు నీరు

विस्मयः = ఆశ్చర్యము

व्यवसायिनाम् = పరిశ్రమ చేసేవారికి

श

शिखरायमाणा = శిఖరమువలె ఎత్తైనది

शिल्पम् = మూర్తి / విగ్రహము

श्रेष्ठत्वम् = దృఢనిశ్చయం, గొప్పదనం

स

संसारे = ప్రపంచంలో

सत्त्ववताम् = బలం కలవారికి

समुपस्थितः = వచ్చియున్నాడు

सम्प्रति = ప్రస్తుతము

स्थापनविषये = ఉంచు విషయంలో/పెట్టు విషయంలో

स्पर्शनम् = తాకడం

SCERT TELANGANA

# क्रियापदकोशः

अ

अभवत् = అయ్యెను

आ

आकर्षति = ఆకర్షిస్తున్నది/డు

आचरन्ति = ఆచరిస్తున్నారు

आनयन्ति = తీసుకొని వస్తున్నారు

आह्वयति = పిలుస్తున్నాడు/ది

उ

उत्पतति = ఎగిరిపడుతున్నాడు/ది

क

क्रीणन्तु = కొనండి

क्षिपन्ति = పడవేస్తున్నారు

ख

खनन्ति = త్రవ్వుచున్నారు

च

चकास्ति = ప్రకాశిస్తున్నాడు/ది

ज

जायते = జరుగుచున్నది

जनयन्ति = పుట్టిస్తున్నాయి/ కలిగిస్తున్నాయి

द

दृश्यन्ते = చూడబడుచున్నాయి/రు

दूषयन्ति = కలుషితం చేయుచున్నారు/న్నవి

न

निपतति = పడుతున్నాడు/ది

प

पलायन्ते = పారిపోతున్నారు/వి

प्रकटयन्ति = తెలుపుతున్నారు

प्रचलति = జరుగుచున్నది

प्रथन्ते = ప్రసిద్ధిపొందుతున్నాయి/రు

प्राप्नुवन्ति = పొందుతున్నారు/యి

भ

भ्रमामि = తిరుగుచున్నాను

व

वदति स्म = చెప్పుచుండెడివాడు

वेत्ति = తెలుసుకొనుచున్నాడు/ది

श

शक्यते = చేయదగియున్నాడు/ది

श्रृण्वन्तु = వినండి/ విందురు గాక

स

सम्भवति = జరుగుతున్నది

स्वीकुर्वन्तु = తీసుకొందురు గాక/ తీసుకోండి

SCERT TELANGANA